Entered 29. 6. 18
CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
5096
PROVINCIAL MUSEUM LUCKNOW REFERENCE LIBRARY

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 1292.

शतसाहस्रिका प्रज्ञापारमिता ।

ÇATASĀHASRIKĀ-PRAJÑĀ-PĀRAMITĀ:

A
THEOLOGICAL AND PHILOSOPHICAL DISCOURSE
OF
BUDDHA WITH HIS DISCIPLES
(IN A HUNDRED-THOUSAND STANZAS).



EDITED BY
PRATĀPACANDRA GHOṢA
PART I. FAS. XVI.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET.
1911.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

The Society's Agents—

MR. BERNARD QUARITCH, 11, *Grafton Street, New Bond Street, London, W.*,
AND MR. OTTO HARRASSOWITZ, BOOKSELLER, *Leipzig, Germany.*

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	
Advaitachintā Kaustubha, Fasc. 1–3 @ /10/ each ...	1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1–8 @ /10/ each	14	6
Aitareyalocana	2	0
*Anu Bhāshya, Fasc. 2-5 @ /10/ each	2	8
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each ...	3	12
Ātmatattvaviveka, Fasc. I	0	10
Açvavaidyaka, Fasc. 1–5 @ /10/ each	3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–8. Vol. II, Fasc. 1–8 @ 1/ each	16	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1–2, Vol. II, Fasc. 1, @ /10/ each	1	14
Baudhāyana Srauta Sūtra, Fasc. 1–3; Vol. II, Fasc. 1-3 @ /10/ each	3	12
Bhāṭṭa Dīpikā, Vol. I, Fasc. 1-6; Vol. II, Fasc. 1, @ /10/ each ...	4	6
Bauddhastotrasangraha	2	0
Bṛhaddevatā, Fasc. 1-4 @ /10/ each	2	8
Bṛhaddharma Purāṇa, Fasc. 1-6 @ /10/ each	3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each ...	3	2
Cri Cantinatha Charita, Fasc. 1-3	1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...	8	0
Çatapatha Brāhmaṇa, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–7; Vol. V, Fasc. 1–4 @ /10/ each ...	14	6
Ditto Vol. VI, Fasc. 1–3 @ 1/4/ each	3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/	3	2
Çatasāhasrikā-prajñāpāramitā, Part I, Fasc. 1–14 @ /10/ each ...	8	12
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1–25; Vol. III, Part I, Fasc. 1-18, Part II, Fasc. 1-10; Vol. IV, Fasc. 1–6 @ /10/ each ...	36	14
Ditto Vol. IV, Fasc. 7-8, @ 1/4/ each ...	2	8
Ditto Vol. IV, Fasc. 8-9 @ /10/		
Çlokavartika, (English), Fasc. 1–7 @ 1/4/ each	8	12
*Çrauta Sūtra of Çānkhāyana, Vol I, Fasc. 1-7; Vol. II, Fasc. 1–4; Vol. III, Fasc. 1–4; Vol. 4, Fasc. 1 @ /10/ each ...	10	0
Çrī Bhāshyam, Fasc. 1–3 @ /10/ each	1	14
Dāna Kriyā Kaumudī, Fasc. 1–2 @ /10/ each	1	4
Gadadhara Paddhati Kālasāra, Vol. 1, Fasc. 1–7 @ /10/ each ...	4	6
Ditto Ācārasāra, Vol. II, Fasc. 1–4	3	2
Gobhilīya Gṛhya Sūtra, Vol. I, @ /10/ each	3	2
Ditto Vol. II, Fasc. 1–2 @ 1/4 /each ...	2	8
Ditto (Appendix) Gobhila Parisista	2	0
Ditto Grihya Sangraha	0	10
Haralata	1	14
Karmapradiph, Fasc. 1	1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each	4	[illegible]
Kātantra, Fasc. 1-6 @ /12/ each	4	[illegible]
[illegible]thā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each ...	17	8
[illegible]ana Pārijāta, Fasc. 1-11 @ /10/ each	6	14
[illegible]-bhāsya-pradīpodyota, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12; Vol. III, Fasc. 1–10 @ /10/ each	19	[illegible]
[illegible]to Vol. IV, Fasc. 1 @ 1/4	1	4
[illegible] Saṅgraha, Fasc. 1-3 @ /10/ each	1	14
[illegible] Purāṇa, (English) Fasc. 1-9 @ 1/- each	9	0
[illegible]arçana, Fasc. 10-19 @ /10/ each	6	4
[illegible] Fasc. 2-6 @ /10/ each	3	2
[illegible]ati, Fasc. 1–7 @ /10/ each	4	6

State ... Lucknow 5096
CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रसोऽनित्य इति ज्ञानं स्पर्शोऽनित्य इति ज्ञानं धर्म्मा अनित्या इति ज्ञानं। चक्षुर्धातुरनित्यं इति ज्ञानं। रूपधातुरनित्य इति ज्ञानं चक्षुर्व्विज्ञानधातुरनित्य इति ज्ञानं। श्रोत्र धातुरनित्य इति ज्ञानं। शब्दधातुरनित्य इति ज्ञानं। श्रोत्र विज्ञानधातुरनित्य इति ज्ञानं। घ्राणधातुरनित्य इति ज्ञानं। गन्धधातुरनित्य इति ज्ञानं। घ्राण-विज्ञानधातुरनित्य इति ज्ञानं। जिह्वाधातुरनित्य इति ज्ञानं। रसधातुरनित्य इति ज्ञानं। जिह्वाविज्ञानधातुरनित्य इति ज्ञानं। कायधातुरनित्य इति ज्ञानं। स्पर्शधातुरनित्य इति ज्ञानं। कायविज्ञानधातुरनित्य इति ज्ञानं। मनोधातुरनित्य इति ज्ञानं। धर्म्मधातुरनित्य इति ज्ञानं। मनोविज्ञानधातुरनित्य इति ज्ञानं। पृथिवीधातुरनित्य इति ज्ञानं। अब्धातुरनित्य इति ज्ञानं। तेजोधातुरनित्य इति ज्ञानं। वायुधातुरनित्य इति ज्ञानं। आकाशधातुरनित्य इति ज्ञानं। विज्ञानधातुरनित्य इति ज्ञानं। अविद्याऽनित्येति ज्ञानं। संस्कारा अनित्या इति ज्ञानं। विज्ञान-मनित्यमिति ज्ञानं। नामरूपमनित्यमिति ज्ञानं। षड़ायतनमनित्य-मिति ज्ञानं। स्पर्शोऽनित्य इति ज्ञानं। वेदनाऽनित्येतिज्ञानं। तृष्णाऽनित्येतिज्ञानं। उपादानमनित्यमिति ज्ञानं। भवोऽनित्य-इति ज्ञानं। जातिरनित्येति ज्ञानं। जरामरणमनित्यमिति ज्ञानं।

तत्र कतमत्सम्वृत्तिज्ञानं यत्परसत्त्वानां परपुद्गलानां चेतसैव चेतोज्ञानं। तत्र कतमत्परिचयज्ञानं। यत्प्रतिपक्षज्ञानं। तत्र कतमद्यथाकतज्ञानं। यत्तथागतस्य सर्व्वाकारज्ञताज्ञानं। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। तच्चाऽनुपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत-त्रीणीन्द्रियाणि। कतमानि त्रीणि। अज्ञातमाज्ञास्यामीतीन्द्रिय-माज्ञेन्द्रियमाज्ञातावीन्द्रियं। तत्र कतमदज्ञातमाज्ञास्यामीतीन्द्रयं। यच्छैक्षाणां पुद्गलानामनभिसमिता विनामिता सम्पदविनयं श्रद्धे-न्द्रियं वीर्य्येन्द्रियं स्मृतीन्द्रियं समाधीन्द्रियं प्राज्ञेन्द्रियमिदमुच्यते-नाज्ञातमाज्ञास्यामीतिन्द्रियं। तत्र कतमदाज्ञेन्द्रियं। यच्छैक्षाणां पुद्गलानामाज्ञातरता श्रद्धेन्द्रियं वीर्य्येन्द्रियं स्मृतीन्द्रियं समाधीन्द्रियं प्रज्ञेन्द्रियमिदमुच्यते आज्ञेन्द्रियं। तत्र कतमदाज्ञातावीन्द्रियं। यच्छैक्षाणां पुद्गलानामर्हतां प्रत्येकबुद्धानां बोधिसत्त्वानां तथा-गतानां श्रद्धेन्द्रियं वीर्य्येन्द्रियं स्मृतीन्द्रियं समाधीन्द्रियं प्रज्ञेन्द्रियमिदमुच्यते आज्ञातावीन्द्रियं। इदमपि सुभूते बोधि-सत्त्वस्य महासत्त्वस्य महायानं। तच्चाऽनुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत-त्रयः समाधयः। कतमे त्रयः सवितर्कः सविचारः समाधिरवितर्को-ऽविचारमात्रः समाधिरवितर्कोऽविचारः समाधिः। तत्र कतमः सवितर्कः सविचारः समाधिः। इह सुभूते बोधिसत्त्वो महासत्त्वो विविक्तं कामैर्व्विविक्तं पापकैरकुशलैर्धर्म्मैः सवितर्कं सविचारं विवे-कजप्रीतिसुखं प्रथमं ध्यानमुपसम्पद्यविहरति। अयमुच्यते सवितर्कः सविचारः समाधिः। तत्र कतमोऽवितर्कोऽविचारमात्र समाधिः। या प्रथमस्य ध्यानस्य द्वितीयस्य ध्यानस्यान्तरिका। अयमुच्यतेऽवितर्को-ऽविचारमात्रः समाधिः। तत्र कतमोऽविचारः समाधिः। यत् द्वितीयं ध्यानं तृतीयं ध्यानं चतुर्थं ध्यानं आकाशानन्त्यायतन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समापत्तिः। विज्ञानाऽनन्त्यायतनसमापत्तिराकिञ्चन्यायतनसमापत्ति नैव संज्ञानासंज्ञायतनसमापत्तिः संज्ञावेदयितनिरोधसमापत्तिरय-मुच्यते अवितर्कः अविचारः समाधिः। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। तच्चाऽनुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत दशानुस्मृतयः। कतमादश, बुद्धाऽनुस्मृति धर्म्माऽनुस्मृतिः संघाऽनुस्मृतिः शीलाऽनुस्मृतिः त्यागाऽनुस्मृतिः देवताऽनुस्मृतिः। आनापाऽनुस्मृतिरुद्वेगाऽनुस्मृतिर्मरणाऽनुस्मृति कायगताऽनुस्मृतिः। रिदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। तच्चाऽनुप-लम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत चत्वारि ध्यानानि। चत्वार्य्यप्रमाणानि चतस्र आरूप्यसमापत्तयः। अष्टौविमोक्षाः। नवाऽनुपूर्व्वविहारसमापत्तयः। तत्र कतमानि चत्वारि ध्यानानि। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापार-मितायां चरन् विविक्तं कामैर्व्विविक्तं पापकैरकुशलैधर्म्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसम्पद्यविहरति। सवितर्क सविचाराणां व्युत्पन्नादध्यात्मसम्प्रसादाच्चेतस एकोती-भावादवितर्कमविचारं समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुप-सम्पद्यविहरति। स प्रीतेर्व्विरागादुपेक्षकोविहरति। स्मृतिमान् सम्प्रजानन् सुखञ्च कायेन प्रतिसम्वेदयति। यत्तदार्य्या आचक्षते उपेक्षकः स्मृतिमान् सुखविहारीनिष्प्रीतिकं तृतीयं ध्यानमुपसम्पद्य-विहरति। ससुखस्य च प्रहाणात दुःखस्य च प्रहाणात् पूर्व्वमेवं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च सौमनस्य दौर्म्मनस्ययोरस्तङ्गमाददुःखाऽसुखमुपेचास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसम्पद्य विहरति। तच्चाऽनुपलम्भ योगेन। इमानि चत्वारि ध्यानानि। तत्र कतमानि चत्वार्य्यप्रमाणानि इह सुभूते बोधिसत्वो महासत्त्व प्रज्ञापारमितायां चरन् मैत्रीसहगतेन चित्तेन विपुलेन महद्गतेना ऽद्वयेना ऽप्रमाणेना ऽवैरेणा ऽसपत्नेनाव्यावध्येन धर्म्मधातुपरमे लोके आकाशधातुपर्य्यवसाने दशदिशःस्फुरित्वा-ऽधिमुच्यापसम्पद्य विहरति। सकरुणासहगतेन चित्तेन विपुलेन महद्गतेना ऽद्वयेना ऽप्रमाणेना ऽवैरेणा ऽसपत्नेनाऽव्यावध्येन धर्म्म-धातुपरमेलोक आकाशधातुपर्य्यवसाने दशदिशःस्फुरित्वाऽधिमु-च्योपसम्पद्य विहरति। समुदितासहगतेन चित्तेन विपुलेन महद्गतेनाद्वयेना ऽप्रमाणेना ऽवैरेणा ऽसपत्नेनाव्यावध्येन धर्म्मधातु-परमेलोक आकाशधातुपर्य्यवसाने दशदिशःस्फुरित्वाऽधिमुच्योप-सम्पद्य विहरति। सउपेचासहगतेन चित्तेन विपुलेन महद्गतेना ऽद्वयेना ऽप्रमाणेना ऽवैरेणाऽसपत्नेनाऽव्यावध्येन धर्म्मधातुपरमेलोक आकाशधातुपर्य्यवसाने दशदिशःस्फुरित्वाऽधिमुच्योपसम्पद्य विह-रति। अनुपलम्भयोगेन। इमानि चत्वार्य्यप्रमाणानि।

कतमास्तस्य आरूप्यसमापत्तयः। इह सुभूते बोधिसत्त्वो-महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वशोरूपसंज्ञानां समतिक्रमात्-प्रतिघसंज्ञानामस्तङ्गामाथानात्वसंज्ञानाम मनसिकारादनन्तमाका-शमित्याकाशानन्त्यायतनमुपसम्पद्य विहरति। सर्व्वश आकाशा-ऽनन्त्यायतन समक्रमादनन्तं विज्ञानमिति विज्ञानानन्त्यायतनमु-पसम्पद्य विहरति। स सर्व्वशोविज्ञानानन्त्यायतनसमतिक्रमान्नास्ति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

किञ्चिदित्याकिञ्चन्यायतनमुपसम्पद्य विहरति। सर्व्वश आकिञ्च-न्यायतन समतिक्रमान्नैव संज्ञानासंज्ञायतनमुपसम्पद्य विहरति। तच्चाऽनुपलम्भयोगेन। इमास्तस्य आरूप्यसमापत्तयः। तत्र कतमेऽष्टौ विमोक्षाः। रूपरूपाणि पश्यत्ययं प्रथमो विमोक्षः। अध्यात्मरूपसंज्ञीवहिर्द्धारूपाणि पश्यत्ययं द्वितीयो विमोक्षः। शून्यताया अधिमुक्तोभवत्ययं तृतीयो विमोक्षः। स सर्व्वशो-रूपसंज्ञानां समतिक्रमात् प्रतिघसंज्ञानामस्तङ्गमात्नानात्वसंज्ञानाम मनसिकारादनन्तमाकाशमित्याकाशानन्त्यायतनमुपसम्पद्य विहरति। अयं चतुर्थो विमोक्षः। स सर्व्वश आकाशानन्त्यायतन समतिक्र-मादनन्तं विज्ञानमिति विज्ञानानन्त्यायतनमुपसम्पद्य विहरति। अयं पञ्चमो विमोक्षः। स सर्व्वशोविज्ञानानन्त्यायतन समति-क्रमान्नास्ति किञ्चिदित्याकिञ्चन्यायतनमुपसम्पद्य विहरति। अयं षष्ठो विमोक्षः। स सर्व्वश आकिञ्चन्यायतन समतिक्रमान्नैव संज्ञानासंज्ञायतनमुपसम्पद्य विहरति। अयं सप्तमो विमोक्षः। स सर्व्वशो नैव संज्ञानासंज्ञायतनसमतिक्रमात् संज्ञावेदयित निरोधमुपसम्पद्य विहरति। अयमष्टमोविमोक्षः। तच्चाऽनुपलम्भ-योगेन। इमेऽष्टौ विमोक्षाः।

तत्र कतमा नवानुपूर्व्वाविहारसमापत्तयः। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् विविक्तं कामैर्विविक्तं पापकैरकुशलैर्धर्म्मैः, स वितर्कः स विचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसम्पद्य विहरति। स वितर्कमविचाराणां व्युपसमादध्यात्मसम्प्रसादाच्चेतस एकोतीभावादवितर्कमविचारं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसम्पद्य विहरति। सप्रीतेर्व्विरागादुपेक्षको विहरति। स्मृतिमान् संप्रजानन् सुखञ्च कायेन प्रतिसम्वेदयति। यत्तदार्य्या आचक्षते उपेक्षकः स्मृतिमान् सुखविहारीनिष्प्रीतिकं तृतीयं ध्यानमुपसम्पद्य विहरति। ससुखस्य च प्रहाणात् दुःखस्य च प्रहाणात् पूर्व्वमेव सौमनस्य दौर्म्मनस्ययो-रस्तङ्गमाददुःखाऽसुखमुपेक्षा स्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसम्पद्य विहरति। स सर्व्वशो रूपसंज्ञानां समतिक्रमात् प्रतिघसंज्ञानाम-स्तङ्गमानानात्व संज्ञानाममनसिकारादनन्तमाकाशमनित्याकाशान-न्त्यायतनमुपसम्पद्य विहरति। स सर्व्वश आकाशानन्त्यायतन समतिक्रमादनन्तं विज्ञानमितिविज्ञानानन्त्यायतनमुपसम्पद्य विह-रति। स सर्व्वशो विज्ञानानन्त्यायतन समतिक्रमान्नाकिञ्चिदित्या किञ्चन्यायतनमुपसम्पद्य विहरति। स सर्व्वश आकिञ्चन्यायतन समतिक्रमान्नैवसंज्ञाना संज्ञायतनमुपसम्पद्य विहरति। स सर्व्वशोनैव संज्ञानासंज्ञायतन समतिक्रमात् संज्ञा वेदायतिनिरोधमुपसम्पद्य विहरति। इमान वा ऽनुपूर्व्वविहारसमापत्तयः।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत दश तथा गतबलानि। कतमानि दश। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् स्थानञ्च स्थानतः। अस्थानञ्चा-स्थानता यथाभूतं प्रजानाति। अतीतानागतप्रत्युत्पन्नानां धर्म्माणां कर्म्मसमादानानाञ्च स्थानशोहेतुशः कर्म्मविपाकं यथाभूतं प्रजानाति। नानाधातुर्ल्लोकेऽनेकधातुर्लोकेऽनेकधातुलोक इति। यथाभूतं प्रजानाति। परसत्वानां परपुङ्गलानामनेकाधिमुक्तिकानां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नानाऽधिमुक्तिकानां यथाभूतं प्रजानाति । परसत्वानां परपुद्गला-नामिन्द्रियपरापरज्ञतानां यथाभूतं प्रजानाति । सर्व्वत्र गामिनीं प्रतिपदं यथाभूतं प्रजानाति । इन्द्रियबलबोध्यङ्गध्यानाविमोक्ष-समाधिसमापत्तिसंक्लेशव्यवदानस्थानं यथाभूतं प्रजानाति । सोऽनेकविधं पूर्व्वनिवासमनुस्मरति । एकमपि जातिमनुस्मरति । यावज्जातिशतमपि सहस्रमपि दशसहस्रमपि जातिकोटिमपि जातिकोटिशतमपि जातिकोटिसहस्रमपि जातिकोटिशतसहस्र-मपि जातिकोटिनियुतशतसहस्रमप्यनुस्मरति । एकमपि कल्पमनु-स्मरति । यावत् कल्पशतमपि कल्पसहस्रमपि कल्पशतसहस्रमपि यावदनेकान्यपि कल्पकोटिनियुतशतसहस्राण्यनुस्मरति । अत्राह-मासमेवं नामैवं गोत्र एवंजातिः । एवमाहारः एवं चिरस्थितिका एवमायुष्मन्तः । सोऽहं ततश्च्युतःसन्नमुत्रोपपन्नो यावत्ततश्च्युतः इहो पन्न इति । यावत् साकारं सोद्देशं सनिर्द्देशमनेकविधं पूर्व्वानिवास-मनुस्मरति । सदिव्येन चक्षुषा विशुद्धेनातिक्रान्त मानुषेण सत्वान् पश्यति । च्यवमानानुत्पद्यमानानुपपन्नानापि सुवर्णान् दुर्वर्णान् हीनान् प्रणीतान् सुगतान् दुर्गतान यावद्यथा कर्म्मोपगान् सत्वान् प्रजानाति । अमी भवन्तः सत्वाः कायदुश्चरितेन समन्वागताः वाक्दुश्चरितेन समन्वागताः । मनोदुश्चरितेन समन्वागताः । आर्य्याणामपवादकामिथ्यादृष्टयस्तद्धेतो स्तत्प्रत्ययकायस्य भेदाद-पायदुर्गतिविनिपातं नरकेषूपपद्यन्ते । अमी पुनर्भवन्तः सत्वाः कायसुचरितेन समन्वागताः वाक्सुचरितेन समन्वागताः मनःसु-चरितेन समन्वागताः । आर्य्याणामनपवादकाः सम्यगदृष्टयःस्तद्धे-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तोऽस्तत्प्रत्ययं कायस्य भेदात् सुगतौ स्वर्गलोके देवेषूपपद्यन्ते इति। आस्रवाणां क्षयादनास्रवचेतोविमुक्तिं प्रज्ञाविमुक्तिं स्वयमभिज्ञाय साक्षात्कृत्वोपसम्पद्य विहरन्ति। क्षीणामेजाति उषितं ब्रह्मचर्य्यं कृतं करणीयं। नापरमिष्टमिति प्रजानाति। इदमपि सुभूते बोधिसत्वस्य महासत्वस्य महायानं। तच्चाऽनुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत चत्वारि वैशारद्यानि। कतमानि चत्वारि। सम्यक्सम्बुद्धस्य च मे प्रतिजानतो। इमे धर्म्मा अनभिसम्बुद्धा इति। अत्र वत मे श्रमणो वा ब्राह्मणो वा देवो वा मारो वा ब्रह्मा वा केनचिद्वा पुनर्लोके-सहधर्म्मेण चोदयेदिति। निमित्तं न समनुपश्याम्यत्र चाहं निमित्त-मसमनुपश्यन् क्षेमं प्राप्तो विहराम्यभयं प्राप्तो वैशारद्यप्राप्तः। उदारमार्षभं स्थानं प्रजानामि। परिषद्गतः सम्यक्सिंहनादं नदामि। ब्राह्मं चक्रं प्रवर्त्तयाम्यप्रवर्त्तनीयं श्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सहधर्म्मेण क्षीणास्रवस्यवत मे प्रतिजानतः। इमे आस्रवाः अपरिक्षीणाः इति। अत्र वत मे श्रमणो वा ब्राह्मणो वा देवो वा मारो वा ब्रह्मा वा केनचिद्वा पुनर्लोके सहधर्म्मेण चोदयति। निमित्तमेव न समनु-पश्याम्यत्र चाहं निमित्तमसमनुपश्यन् क्षेमप्राप्तोधिऽराम्यभयप्राप्तो वैशारद्यप्राप्तः। उदारार्षभ स्थानं प्रजानामि। परिषद्गतः सम्यक् सिंहनादं नदामि। ब्राह्मं चक्रं प्रवर्त्तयाम्यप्रवर्त्तनीयं श्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सहधर्म्मेण। ये खलु पुनर्मयान्तरायिकाधर्म्मा आख्याता। तान्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतिषेवतो नालमन्तरायेति नेदं स्थानं विद्यते। अत्र वत मे श्रमणो वा ब्राह्मणो वा देवो वा मारो वा ब्रह्मा वा केनचिद्वा पुनर्लोके सहधर्म्मेण चोदयेदिति। निमित्तमेव न समनुपश्याम्यत्र चाहं निमित्तमसमनुपश्यन् क्षेमप्राप्तो विहराम्यभयप्राप्तो वैशारद्यप्राप्तः। उदारमार्षभं स्थानं प्रतिजानामि। पर्षद्गतः सम्यक् सिंहनादं नदामि। ब्राह्मं चक्रं प्रवर्त्तयाम्यप्रवर्त्तनीयं श्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सहधर्म्मेण। याश्च मया प्रतिपद आख्याताः। आर्य्यनिर्य्याणिकानैवाधिकास्तत्करस्य सम्यग्दुःखक्षयायताः प्रतिपद्यमानो न निर्यायाऽसम्यग्दुःखक्षयायेति नेदं स्थानं विद्यते। अत्र वत मे श्रमणो वा ब्राह्मणो वा देवो वा मारो वा ब्रह्मा वा केनचिद्वा लोके सहधर्म्मेण चोदयति। निमित्तमेव न समनुपश्याम्यत्र चाहं निमित्तमसमनुपश्यन् क्षेमप्राप्तो विहराम्यभयप्राप्तो वैशारद्यप्राप्तः। उदारमार्षभं स्थानं प्रजानामि। परिषद्गतः सम्यक् सिंहनादं नदामि। ब्राह्मं चक्रं प्रवर्त्तयाम्यप्रवर्त्तनीयः श्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सहधर्म्मेण। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं तच्चाऽनुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं यदुत चतस्रः प्रतिसम्विदः। कतमाश्चतस्रः। अर्थप्रतिसम्विद्धर्म्मप्रतिसम्विन्निरुक्तिप्रतिसम्वित्प्रभा न प्रतिसम्वित्। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। तच्चानुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽष्टादशावेणिकाबुद्धधर्म्माः। कतमेऽष्टादश। याञ्च रात्रिं तथागतो-ऽनुत्तरां सम्बोधिमभिसम्बुद्धो याञ्च रात्रिं स देवकं लोकं समारकं सब्रह्माकं सश्रमण ब्राह्मणीम्प्रजां सदेवमानुषासुरां दुःखक्षयाय गामिनो मार्गशानुशाशिष्यानुपधिशेषे निर्व्वाणधातौ परिनिर्व्वा-ण्यान्यच अत्रान्तरा नास्ति तथागतस्य स्खलितं नास्ति चरितं नास्ति मुषितस्मृतिर्ना नास्ति नानात्वसंज्ञानास्त्यसमाहितं चित्तं नास्ति अप्रतिसंख्यायोपेक्षानास्ति छन्दपरिहानिर्नास्ति वीर्य्यपरि-हानिर्नास्ति स्मृतिपरिहानिर्नास्ति समाधिपरिहानिर्नास्ति प्रज्ञा-परिहानिर्नास्ति विमुक्तिपरिहानिर्नास्ति विमुक्तिज्ञानदर्शनपरि-हानिः। सर्व्वं कायकर्म्मज्ञानपूर्व्वङ्गमं ज्ञानानुपरिवर्त्ति। सर्व्वं वाक्कर्म्मज्ञानपूर्व्वङ्गमं ज्ञानानुपपरिवर्त्ति। सर्व्वं मनःकर्म्मज्ञानपूर्व्वङ्गमं ज्ञानानुपरिवर्त्ति। अतीतेऽध्वनि अप्रतिहतमसङ्गं ज्ञानं दर्शनं प्रवर्त्तते। अनागतेऽध्वन्यप्रतिहतमसंज्ञानदर्शनं प्रवर्त्तते। प्रत्युत्पन्ने-ऽध्वान्यप्रतिहतमसंज्ञानदर्शनं प्रवर्त्तते। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। तच्चाऽनुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं यदुत धारणीमुखानि। कतमानि धारणीमुखानि। अक्षरसमता भाष्य-समता अक्षरमुखमक्षरप्रवेशः। तत्र कतमदक्षरमुखाक्षरप्रवेशः। अकारोमुखं सर्व्वधर्म्माणामाद्यनुत्पन्नत्वात्। रकारोमुखं सर्व्वधर्म्माणां रजोपगतत्वात्। यकारोमुखं सर्व्वधर्म्माणां परमार्थनिर्द्दिशत्वात्। चकारोमुखं सर्व्वधर्म्माणां च्यवनोपपत्त्यनुपलब्धित्वात्। सर्व्वधर्म्मान च्यवन्ते नोपपद्यन्ते। नकारोमुखं सर्व्वधर्म्माणां नामापगतत्वात्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नामप्रकृत्यानलब्धं न नष्टं। लकारोमुखं सर्व्वधर्म्माणां लोकोत्तीर्ण-त्वात् तृष्णालताहेतुप्रत्ययसमुत्थादितत्वात्। दकारोमुखं सर्व्वधर्म्माणां दान्तदमथपरिच्छिन्नत्वात्। वकारोमुखं सर्व्वधर्म्माणां बद्ध न विगतत्वात्। उकारोमुखं सर्व्वधर्म्माणां उभयगतत्वात्। सकारोमुखं सर्व्वधर्म्माणां सङ्गाऽनुपलब्धित्वात्। न सज्यते न बध्यते। वकारोमुखं सर्व्वधर्म्माणां वाच्यग्रेष समुच्छिन्नत्वात्। तकारोमुखं सर्व्वधर्म्माणां तथताऽविचलितत्वात्। यकारोमुखं सर्व्वधर्म्माणां यावदनुपलब्धि-त्वात्। स्तकारोमुखं सर्व्वधर्म्माणां स्तम्भानुपलब्धित्वात्। काकारोमुखं सर्व्वधर्म्माणां कारकाऽनुपलब्धित्वात्। सकारोमुखं सर्व्वधर्म्माणां समताऽनुपलब्धित्वात्। समन्तान्न व्यतिवर्त्तते। मकारोमुखं सर्व्वधर्म्माणां मकारानुपलब्धितामुपादाय। गकारोमुखं सर्व्वधर्म्माणां गमनाऽनुपलब्धित्वात्। मकारोमुखं सर्व्वधर्म्माणां स्थानाऽनुपलब्धि-त्वात्। जकारोमुखं सर्व्वधर्म्माणां जात्यनुपलब्धित्वात्। श्वकारोमुखं सर्व्वधर्म्माणां श्वासाऽनुपलब्धित्वात्। धकारोमुखं सर्व्वधर्म्माणां धर्म्मधात्वनुपलब्धित्वात्। शकारोमुखं सर्व्वधर्म्माणां शमथाऽनुप-लब्धित्वात्। खकारोमुखं सर्व्वधर्म्माणां खसमताऽनुपलब्धित्वात्। चकारोमुखं सर्व्वधर्म्माणां चयाऽनुपलब्धित्वात्। स्तकारोमुखं सर्व्व-धर्म्माणां स्तवाऽनुपलब्धित्वात्। ज्ञकारोमुखं सर्व्वधर्म्माणां ज्ञाना-ऽनुपलब्धित्वात्। तकारोमुखं सर्व्वधर्म्माणां मात्राऽनुपलब्धित्वात्। ह्कारोमुखं सर्व्वधर्म्माणां हेत्वनुपलब्धित्वात्। भकारोमुखं सर्व्व-धर्म्माणां भङ्गानुपलब्धितः। छकारोमुखं सर्व्वधर्म्माणां छेदनाऽनुप-लब्धितः। स्मकारोमुखं सर्व्वधर्म्माणां स्मरणाऽनुपलब्धितः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षकारोमुखं सर्व्वधर्म्माणामाज्ञानानुपलब्धितः। झकारोमुखं सर्व्वधर्म्माणामुत्साहाऽनुपलब्धितः। घकारोमुखं सर्व्वधर्म्माणां घनाऽनुपलब्धितः। ठकारोमुखं सर्व्वधर्म्माणां विठयाऽनुपलब्धितः। णकारोमुखं सर्व्वधर्म्माणां रणविगतत्वात्। न कश्चिदगच्छति नागच्छति न तिष्ठति नानिषीदिति न शय्यं कल्पयति न विकल्पयति। लकारोमुखं सर्व्वधर्म्माणां फलाऽनुपलब्धित्वात्। स्ककारोमुखं सर्व्वधर्म्माणां स्कन्धाऽनुपलब्धित्वात्। स्पकारोमुखं सर्व्वधर्म्माणां स्पकाराऽनुपलब्धित्वात्। स्चकारोमुखं सर्व्वधर्म्माणां चर्य्याऽनुपलब्धित्वात्। ढकारोमुखं सर्व्वधर्म्माणां ढकारानुपलब्धित्वात्। ह्कारोमुखं सर्व्वधर्म्माणां ह्कारानुपलब्धित्वात्। पर्य्यन्तनिष्ठास्थानेनच्यवन्तेनोपद्यन्ते। नास्यत उत्तर्य्यचरव्यवहारः। तत्कस्य हेतोस्तथाहि न कस्यचित् किञ्चिदन्यन्नामव्यवह्रियते येनाऽभिलप्येत। येन निर्द्दिश्यते यल्लिख्येत दृश्येत वाच्येत। तद्यथापि नाम सुभूते आकाशमेव सर्व्वधर्म्मा अनुगन्तव्याः। अयमुच्यते धारणीमुखप्रवेशः। अकाराद्यचरनिर्द्देशप्रवेशः। यो हि कश्चित् सुभूते बोधिसत्त्वो महासत्त्वः इदमकाराद्यचरकौशल्यं ज्ञास्यति। स न क्वचिद्रुते संचति। सर्व्वधर्म्मसमतायां संसाधयिष्यति। रुतज्ञानकौशल्यञ्च प्रतिलप्स्यते। योहि कश्चित् सुभूते बोधिसत्त्वो महासत्त्वः। इदमकाराद्यचरप्रवेशमुद्रामकाराद्यचरप्रवेशमुद्रापदानि श्रोष्यति। श्रुत्वा चोद्ग्रहीष्यति धारयिष्यति वाचयिष्यति पर्य्यवाप्स्यति। परेभ्यश्च देशयिष्यति न य प्रतीतयाबुद्ध्या तस्य विंशतिरनुशंसाः प्रतिकाङ्क्षितव्याः। कतमे विंशतिः। तदुत स्मृतिमांश्च भविष्यति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मतिमांश्च बुद्धिमांश्च धृतिमांश्च ह्रीमांश्च प्रज्ञावांश्च प्रतिभानवांश्च। इदश्च धारणीमुखमल्पकृच्छ्रेण प्रतिलप्स्यते। न कथं कथीभविष्यति। धिमतिश्चाऽस्य न भविष्यति। न च परस्यान्तिकाच्छ्रुचां वाचं श्रुत्वाऽनुनेष्यते। नपरुषां वाचं श्रुत्वा प्रतिहंस्यते। नोन्नतोभविष्यति नाऽवनतः। यथास्थित एव भविष्यति। रुतकुशलश्च भविष्यति। स्कन्धाकुशलश्च भविष्यति। धातुकुशलश्च भविष्यति। आयतनकुशलश्च भविष्यति। सत्यकुशलः। प्रतीत्य समुत्पादकुशलः। हेतुकुशलः प्रत्ययकुशलः। धर्म्मताकुशलः। इन्द्रियपरापरज्ञानकुशलः। च्युतोपपत्तिकुशलः। दिव्यश्रोत्रज्ञानकुशलः। परचित्तज्ञानकुशलः। पूर्व्वनिवासाऽनुस्मृतिज्ञानकुशलः। ऋद्धिविधिज्ञानकुशलः। आस्रवक्षयज्ञानकुशलः। स्थानाऽस्थाननिर्देशकुशलः। अतिक्रमणकुशलः। प्रतिक्रमणकुशलः। ईर्य्यापथकुशलः। चयत्राय्यकौशलञ्चाऽनुप्राप्स्यति। इदमपि सुभूते धारणीमुखमकाराद्यक्षरप्रवेशो बोधिसत्त्वस्य महासत्त्वस्य महायानं। तच्चाऽनुपलम्भयोगेन ॥ ० ॥

शतसाहस्र्यां प्रज्ञापारमितायां नवमः परिवर्त्तः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ दशमः परिवर्त्तः।

यदपि सुभूतिरेवमाह। कथं बोधिसत्त्वो महासत्त्वो महायान-संप्रस्थितो भवतीति। इह सुभूते बोधिसत्त्वो महासत्त्वः षट्सु पारमितासु चरन् भूमेर्भूमिं संक्रामति। कथञ्च सुभूते बोधि-सत्त्वोमहासत्त्वः षट्सु पारमितासु चरन् भूमेर्भूमिं संक्रामति। यदुत संक्रान्त्यासर्व्वधर्म्माणां न हि कश्चिद्धर्म्म आगच्छति वा गच्छति वा संक्रामति वा अपसंक्रामति वा। अपि तु या सर्व्व-धर्म्माणां भूमिस्तां स न मन्यते। न चिन्तयति। न भूमिपरिकर्म्म च करोति। न च तां भूमिं समनुपश्यति। तत्र कतमद्बोधिसत्त्वस्य महसत्त्वस्य भूमिपरिकर्म्म। प्रथमायां सुभूते भूमौ वर्त्तमानेन बोधिसत्त्वेन महासत्त्वेन दशपरिकर्म्माणि करणीयानि। कतमानि दश। अध्याशयादि परिकर्म्माऽनुपलम्भयोगेन हितवस्तुतापरिकर्म्म-निमित्ताऽनुपलब्धितामुपादाय। सर्व्वसत्त्वसमचित्ततापरिकर्म्मसत्त्वा-नुपलब्धितामुपादाय। त्यागपरिकर्म्मदानदायकपरिग्राहकाऽनुप-लब्धितामुपादाय। कल्याणमित्रसेवनापरिकर्म्मतैरमण्यतामुपादाय। धर्म्मपर्य्येष्टिपरिकर्म्मसर्व्वधर्म्माऽनुपलब्धितामुपादाय। अभीक्ष्णनैष्क्रम्य-परिकर्म्मगृहानुपलब्धितामुपादाय। बुद्धकायस्पृहापरिकर्म्मलक्षणा-ऽनुव्यञ्जननिमित्ताऽनुपलब्धितामुपादाय। धर्म्मविवरणपरिकर्म्म-भेदाऽनुपलब्धितामुपादाय। मानस्तम्भनिर्घातनपरिकर्म्ममद्भुतता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽनुपलब्धितामुपादाय। सत्यवचनपरिकर्म्मवचनाऽनुपलब्धितामुपादाय। इमानि सुभूते बोधिसत्त्वेन महासत्त्वेन प्रथमायां भूमौ वर्त्तमानेन दशपरिकर्म्माणि करणीयानि।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन द्वितीयायां भूमौ वर्त्तमानेनाष्टौधर्म्मा अभीक्ष्णं मानसि कर्त्तव्या। तत्र च प्रतिपत्तव्यं। कतमेऽष्टौ। यदुत शीलपरिशुद्धिः कृतज्ञताकृतवेदिता। क्षान्तिबलप्रतिस्थानं। प्रामोद्यं। प्रीत्यनुभवनता। सर्व्वसत्त्वपरित्यागिता। महाकरुणाया आमुखीभावः। गुरुशुश्रूषा। श्रद्धागौरवता। पारमिता सूद्योगपर्य्येष्टिः। इमे सुभूते बोधिसत्त्वेन महासत्त्वेन द्वितीयायां भूमौ वर्त्तमानेनाष्टौ धर्म्माः अभीक्ष्णं मनसि कर्त्तव्यस्तत्र च प्रतिपत्तव्यम्।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन तृतीयायां भूमौ वर्त्तमानेन पञ्चसुधर्म्मेषु स्थातव्यं। कतमेषु पञ्चसु। यदुतबाहुश्रुत्यातृप्ततायां। तत्र चाक्षरानभिनिवेशेन निरामिषधर्म्मविचरणतायां। तथाचाऽमन्यनतया बुद्धक्षेत्रे परिशोधनकुशलमूलावरोपणपरिणामनतायां। तथाचाऽमन्यनतया अपरिमितसंसारापरिखेदतायां। तथाचाऽमनन्यतयाह्मपत्राप्यस्थानतायां। तथाचाऽमनन्यतया एषु सुभूते पञ्चसुधर्म्मेषु बोधिसत्त्वेन महासत्त्वेन तृतीयायां भूमौ वर्त्तमानेन स्थातव्यम्।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन च चतुर्थ्यांभूमौ वर्त्तमानेन दशधर्म्मान् समादायवर्त्तितव्यं। तेन च परित्यक्तव्याः। कतमेदश। अरण्यवासं। अल्पेच्छतया सन्तुष्टिता। धुतगुणसंलेखा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽनुवर्जनता । शिक्षाया अपरित्यागिता । कामगुणजुगुप्सनता । निर्वृतेसहगतचित्तोत्पादः । सर्व्वसत्त्वपरित्यागिता । अनवलीनचित्तता । सर्व्ववस्त्वनपेक्षणता । इमे सुभूते दशधर्म्माः बोधिसत्त्वेन महासत्त्वेन चतुर्थ्यां भूमौ वर्त्तमानेन न परित्यक्तव्याः । समादाय च वर्त्तितव्यम् ।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन पञ्चम्यां भूमौ वर्त्तमानेन षड्धर्म्माः परिवर्जयितव्याः । कतमे षट् यदुतगृहिसंस्तवः परिवर्जयितव्यः । भिक्षुणीसंस्तवः । कुलमात्सर्य्यं । संगणिकास्थानं । आत्मोत्कर्षणतापरपंसनता । इमे षट्धर्म्माः परिवर्जयितव्याः । पुनरष्टादशधर्म्माः परिवर्जयितव्याः । यदुतदशाऽकुशलाः कर्म्मपथाः परिवर्जयितव्याः । मानस्तम्भविपर्य्यासा, विचिकित्सा, राग, द्वेष, मोह, धिवामनता, इमे ऽष्टादशधर्म्मा बोधिसत्त्वेन महासत्त्वेन पञ्चम्यां भूमौ वर्त्तमानेन परिवर्जयितव्याः ।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन षष्ठ्यां भूमौ वर्त्तमानेन षड्धर्म्माः परिपूरयितव्याः । यदुत षट्पारमिताः । अपरे षड्धर्म्माः परिवर्जयितव्याः । कतमे षट्श्रावकचित्तं परिवर्जयितव्यं । प्रत्येकबुद्धचित्तं परिवर्जयितव्यं । परितर्षणचित्तं परिवर्जयितव्यं । याचनकं दृष्ट्वाऽनवलीनपरिवर्जयितव्यं । नाऽवलीयितव्यं । सर्व्ववस्तुनि परित्यज्यदुर्मनस्कतापरिवर्जयितव्याः । न दुर्म्मनस्केन भवितव्यं । याचनकं दृष्ट्वा विक्षेपचित्तं परिवर्जयितव्यं । न याचनकं विक्षेपः कर्त्तव्यः । इमे सुभूते बोधिसत्त्वेन महासत्त्वेन षष्ठ्यां भूमौ वर्त्तमानेन षड्धर्म्माः परिवर्जयितव्याः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन सप्तम्यां भूमौ वर्त्तमानेन विंशतिधर्म्मा न कर्त्तव्याः। कतमे विंशतिः। यदुत आत्मग्राहो न कर्त्तव्यः। सत्यग्राहो न कर्त्तव्यः। जीवग्राहो न कर्त्तव्यः। पुद्गलग्राहो न कर्त्तव्यः। उच्छेदग्राहो न कर्त्तव्यः। शाश्वतग्राहो न कर्त्तव्यः। निमित्तसंज्ञा न कर्त्तव्या। हेतुदृष्टिः स्कन्धाऽभिनिवेशो धात्वभिनिवेशः। आयतनाऽभिनिवेशः। त्रैधातुकाऽभिनिवेशः। त्रैधातुकाऽध्यवसानं। त्रैधातुकालयः। बुद्धनिश्रयदृष्ट्यभिनिवेशः। धर्म्मनिश्रयदृष्ट्यभिनिवेशः। संघनिश्रयदृष्ट्यभिनिवेशः। शीलनिश्रयदृष्ट्यभिनिवेशः। शून्याधर्म्मा इति विषादः। शून्यानिरोधास्य। इमे सुभूते विंशतिर्धर्म्मा न कर्त्तव्याः। तेन विंशतिरेव धर्म्माः परिपूरयितव्याः। कतमे विंशतिः। यदुत शून्यताप्रतिषेधः। आनिमित्तसाक्षात्क्रिया। अप्रणिहितज्ञानं। त्रिमण्डलपरिशुद्धिः। कृपाकारुण्यतासर्व्वसत्त्वेषु। ते च सत्त्वानाऽवमन्तव्याः। सर्व्वधर्म्मसमतादर्शनं। तत्र चाऽनभिनिवेशः। भूतनयप्रतिवेधः। तेन चाऽमनता। अनुत्पादक्षान्तिः। अनुत्पादज्ञानं। एकनयनिर्देशः। सर्व्वधर्म्माणां कल्पनासमुद्घातः। संज्ञाविवर्त्तः। दृष्टिविवर्त्तः। क्लेशविवर्त्तः। शमथविपश्यनाभूतिः। दान्तचित्तता। अप्रतिहतज्ञानता। अनूनता। अवसरज्ञता। यत्रेच्छात्रेगमनता। इमे सुभूते बोधिसत्त्वेन महासत्त्वेन सप्तम्यां भूमौ वर्त्तमानेन विंशतिधर्म्माः परिपूरयितव्याः।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेनाऽष्टम्यां भूमौ वर्त्तमानेन चत्वारोधर्म्माः परिपूरयितव्याः। कतमे चत्वारः। यदुत

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्व्वसत्त्वचित्ताऽनुप्रवेशः । अभिज्ञाविक्रीड़नता । बुद्धक्षेत्रदर्शनता । तेषां बुद्धक्षेत्राणां यथा दृष्टानां परिनिष्पादनता । बुद्धपर्य्युपासनता । बुद्धकाय यथाभूत प्रत्यवेक्षणता । इमे सुभूते चत्वारोधर्म्माः परिपूरयितव्याः । पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेनाष्टम्यां भूमौ वर्त्तमानेन चत्वारोधर्म्माः परिपूरयितव्याः । यदुतेन्द्रिय परापरज्ञानता । बुद्धक्षेत्रपरिशोधनता । मायोपमसमाधेरभीक्ष्ण-समापद्यनता । यथायथा सत्त्वानां कुशलमूलानि परिनिष्पद्यन्ते । तथा तथात्मभावपरिनिष्पादनता । संचिन्त्य भवोपादानता । इमे सुभूते बोधिसत्त्वेन महासत्त्वेनाष्टम्यां भूमौ वर्त्तमानेन चत्वारोधर्म्माः परिपूरयितव्याः ।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन नवम्यां भूमौ वर्त्तमानेन द्वादशधर्म्माः परिपूरयितव्याः । कतमे द्वादश । यदुत अनन्तप्रणिधानपरिग्रहः । स यथायथाप्रणिदधाति तथातथाऽस्य समृध्यति । देवनागयक्षगन्धर्व्वासुरगरुड़किन्नरमहोरगरुतज्ञानं । परिपूर्णप्रणिधाननिर्देशज्ञानं । गर्भविक्रान्तिसम्पत् । गोत्र सम्पत् । परिवारसम्पत् । जन्मसम्पत् । बोधिवृक्षव्यूहसम्पत् । सर्व्वगुणपरिपूरिसम्पत् । इमे सुभूते बोधिसत्त्वेन महासत्त्वेन नवम्यां भूमौ वर्त्तमानेन द्वादशधर्म्माः परिपूरयितव्याः ।

दशम्यां पुनः सुभूते भूमौ वर्त्तमाने बोधिसत्त्वो न महासत्त्वस्तथागत एव वक्तव्यः । एवमुक्त आयुष्मान् सुभूतिर्भगवन्तमेतदवोचत् । कतमद्भगवन् बोधिसत्त्वस्य महासत्त्वस्याध्याशयादिपरिकर्म्म । भगवानाह । यः सुभूते बोधिसत्त्वोमहासत्त्व सर्व्वकारज्ञताप्रति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संयुक्तैश्चित्तोत्पादैः कुशलमूलानि समुदानयति। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्याध्याशयादिपरिकर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य सर्व्वसत्त्वसमचित्ततापरिकर्म्म। सर्व्वाकारज्ञताप्रतिसंयुक्तैश्चित्तोत्पादैश्च आर्य्यप्रमाणान्यभिनिर्हरति। मैत्रीकरुणामुदितोपेचमिदमुच्यते बोधिसत्त्वस्य महासत्त्वस्य सर्व्वसत्त्वसमचित्ततापरिकर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य त्यागपरिकर्म्म। यत्सर्व्वसत्त्वेभ्योऽविकल्पतस्तद्दानं ददातीदमुच्यते बोधिसत्त्वस्य महासत्त्वस्य त्यागपरिकर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य कल्याणमित्रसेवनापरिकर्म्म। यदुत तानि बोधिसत्त्वस्य महासत्त्वस्य कल्याणमित्राणि यान्येव सर्व्वाकारज्ञतायां समादापयन्ति। निवेशयन्ति। प्रतिष्ठापयन्ति। तेषां कल्याणमित्राणां या सेवना भजना पर्य्युपासना गुरुशुश्रूषणता। इयमुच्यते बोधिसत्त्वस्य महासत्त्वस्य कल्याणमित्रसेवनापरिकर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य धर्म्मपर्य्येष्टिपरिकर्म्म। यत् सर्व्वाकारज्ञताप्रतिसंयुक्तैश्चित्तोत्पादैर्धर्म्मं पर्य्येषते। न श्रावकप्रत्येकबुद्धभूमौ पततीदं बोधिसत्त्वस्य महासत्त्वस्य धर्म्मपर्य्येष्टिपरिकर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्याऽभीक्ष्णं नैष्क्रम्यपरिकर्म्म। यत् सर्व्वसत्त्वजातावव्यवकीर्णो निष्क्रमति। तथागत शासने प्रव्रजति। न चाऽस्य कश्चिदन्तरायं करोतीदं बोधिसत्त्वस्य महासत्त्वस्याऽभीक्ष्णं नैष्क्रम्यपरिकर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य बुद्धकायस्पृहापरिकर्म्म। यद्बुद्धविग्रहं दृष्ट्वा न कदाचिद्बुद्धमनसिकारेण विरहितो भवति यावत् सर्व्वकारज्ञतामनुप्राप्नोतीदं बोधिसत्त्वस्य महासत्त्वस्य बुद्धकायस्पृहापरिकर्म्म।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य धर्म्मविवरणपरिकर्म्म। यद्बोधिसत्त्वो महासत्त्वः संमुखीभूत तथागत परिनिर्वृत्तं सत्त्वेभ्यो धर्म्मं देशयति। आदौ कल्याणं मध्येकल्याणं पर्य्यवसानेकल्याणं स्वर्थं सुव्यञ्जनं केवलं परिपूर्णं परिशुद्धं पर्य्यवदातं ब्रह्मचर्य्यं सम्प्रकाशयति। यदुत सूत्रं गेयं व्याकरणं गाथोद्दाननिदानत्युक्तकजातकवैपुल्याद्भुतधर्म्माऽववादोपदेशादिदं बोधिसत्त्वस्य महासत्त्वस्य धर्म्मविवरणपरिकर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य मानस्तम्भनिर्घातनपरिकर्म्म। येन मानस्तम्भनिर्घातेन न जातु नीचकुलेषूपपद्यते। इदं बोधिसत्त्वस्य महासत्त्वस्य मानस्तम्भनिर्घातनपरिकर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य सत्यवचनपरिकर्म्म। यदुत यथा वादिता तथा कारिता। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य सत्यवचनपरिकर्म्म। इमानि सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रथमायां भूमौ वर्त्तमानस्य दशपरिकर्म्माणि। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य शीलपरिशुद्धिः। यदुत श्रावक प्रत्येकबुद्धचित्तानाम मनसिकारः। येऽपि तदन्यदौःशील्यकराः। बोधिपरिपन्थकराः धर्म्माः तेषामप्यमनसिकारः। इयं बोधिसत्त्वस्य महासत्त्वस्य शीलपरिशुद्धिः। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य कृतज्ञता कृतकारिता। यद्बोधिसत्त्वो महासत्त्वो बोधिसत्त्वचर्य्यां चरत्नन्यमपि कृतमीमं सारान्ननासयति। प्रागेव इयं बोधिसत्त्वस्य महासत्त्वस्य कृतज्ञता कृतकारिता। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य क्षान्तिबलप्रतिष्ठानं। यत् सर्व्वसत्त्वानामन्तिके व्यापाद अविहिंसाचिन्तता। इदं बोधिसत्त्वस्य महासत्त्वस्य क्षान्तिबल-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतिष्ठानं। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्यप्रामाद्य प्रीत्यनुभवनता। यदुत सर्व्वसत्त्वपरिपाचनता त्रिषु यानेषु। इयं बोधिसत्त्वस्य महासत्त्वस्य प्रामोद्य प्रीत्यनुभवनता। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य सर्व्वसत्त्वापरित्यागिता। यदुत सर्व्वसत्त्वानां परित्राणता। इदं बोधिसत्त्वस्य महासत्त्वस्य सर्व्वसत्त्वापरित्यागिता। तत्र कतमो बोधिसत्त्वस्य महासत्त्वस्य महाकरुणया आमुखीभावः। यद्बोधिसत्त्वस्य महासत्त्वस्य बोधिसत्त्वचारिकाञ्चरत एवं भवति। एकैकस्याहं सत्त्वस्यार्थाय गङ्गानदीवालुकोपमान् कल्पान्निरयेषु वसन् तत्र छेदनभेदनकुण्डनक्लेदनपचनान्यनुभवेयं यावन्नसत्त्वा बुद्धज्ञानप्रतिष्ठापिता भवेत्। एवं यावत् सर्व्वसत्त्वानां कृते यात्युत्सहनता अपरिखेदः। अयमुच्यते बोधिसत्त्वस्य महासत्त्वस्य महाकरुणाया आमुखीभावः। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य गुरुशुश्रुषाश्रद्धागौरवता। यदुत गुरुणामन्तिके शास्तृसंज्ञा। इयमुच्यते बोधिसत्त्वस्य महासत्त्वस्य गुरुशुश्रुषाश्रद्धागौरवता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य पारमिता सूद्योगपर्य्येष्टिः। यदुतानन्यकृतकर्म्मतया पारमितानां पर्य्येषणता सर्व्वसत्त्वपरिपाचनतायै। इयं बोधिसत्त्वस्य महासत्त्वस्य पारमितासूद्योगपर्य्येष्टिः। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य बाहुश्रुत्यातृप्तता। यत्किञ्चिद्बुद्धैर्भगवद्भिर्भाषितमिहलोकधातौ समन्ताद्दशसु दिचुलोकधातुषु तत्सर्व्वमाधारयिष्यामीति यात्यतृप्तता। इयं बोधिसत्त्वस्य महासत्त्वस्य बाहुश्रुत्यातृप्तता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य निरामिषधर्म्मदानविवरणता। यद्बोधिसत्त्वो

5096

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महासत्त्वो धर्म्मं देशयस्तेन धर्म्मदानेनान्तशो बोधिमपि न प्रति-काङ्क्षति । इयं बोधिसत्त्वस्य महासत्त्वस्य निरामिषधर्म्मदानविव-रणता । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य बुद्धक्षेत्रपरिशोधन कुशलमूलावरोपणता । यैः कुशलमूलैर्बुद्धक्षेत्रं परिशोधयन् नाम-परचित्तक्षेत्रं परिशोधयति । तेषां कुशलमूलानां परिणामना । इयं बोधिसत्त्वस्य महासत्त्वस्य बुद्धक्षेत्रपरिशोधनकुशलमूलावरो-पणपरिणामगता । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्यापरि-मितसंसारापरिखेदनता । यदुत कुशलमूलोपस्तम्भनतायै कुशल-मूलैरुपस्तब्धः सत्त्वांश्च परिपाचयति । बुद्धक्षेत्रञ्च परिशोधयति । न च कदाचित् खेदनोपपद्यते । यावत् सर्व्वकारज्ञतां परिपूर-यति । इयं बोधिसत्त्वस्य महासत्त्वस्यापरिमितसंसाराऽपरिखेद-नता । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य ह्यपत्राप्यस्थानं । यदुत श्रावक प्रत्येकबुद्धचित्तजुगुप्सनता । इदं बोधिसत्त्वस्य महा-सत्त्वस्य ह्यपत्राप्यस्थानं । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्यारण्य-वासापरित्यागिता । याश्रावकप्रत्येकबुद्धभूमेरतिक्रमणता । इयं बोधिसत्त्वस्य महासत्त्वस्यारण्यवासापरित्यागिता । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्याऽल्पेच्छता । यद्बोधिसत्त्वो महासत्त्वो बोधि-मपि नेच्छतीतीयं बोधिसत्त्वस्य महासत्त्वस्याल्पेच्छता । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य सन्तुष्टिता । यत्सर्व्वाकारज्ञता प्रतिलम्भे-नापि न लभ्यते । इयं बोधिसत्त्वस्य महासत्त्वस्य सन्तुष्टिता । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य धुतगुणसंलेखेऽनुवर्त्तनता । यदुत गम्भीरेषु धर्म्मेषु निर्याण क्षान्तिरियं बोधिसत्त्वस्य महासत्त्वस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धुतगुणसंलेखानुवर्त्तनता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य शिक्षाया अपरित्यागिता। यत्र सर्व्वशिक्षानामप्रचारः। इयं बोधिसत्त्वस्य महासत्त्वस्य शिक्षाया अपरित्यागिता। तत्र कतमा- बोधिसत्त्वस्य महासत्त्वस्य कामगुणजुगुप्सनता। कामचित्तस्याऽनुत्पादः। इयं बोधिसत्त्वस्य महासत्त्वस्य कामगुणजुगुप्सनता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य निवृत्तिसहगतश्चित्तोत्पादः। यदुत सर्व्वधर्म्माणामनभिसंस्कारः। अयं सुभूते बोधिसत्त्वस्य महासत्त्वस्य निवृत्तिसहगतश्चित्तोत्पादः। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य सर्व्वस्वपरित्यागिता। याध्यात्मिकवाह्यानां धर्म्माणामग्रहणता। इयं बोधिसत्त्वस्य महासत्त्वस्य सर्व्वस्वपरित्यागिता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्यावलीनचित्तता। यद्विज्ञानस्थितिस्तस्य चित्तं न तिष्ठति। इयं बोधिसत्त्वस्य महासत्त्वस्यावलीनचित्तता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य सर्व्ववस्तुनिरपेक्षता। यः सर्व्ववस्तूनाम मनसिकारः। इयं बोधिसत्त्वस्य महासत्त्वस्य सर्व्ववस्तुनिरपेक्षता। तत्र कतमा बोधित्त्वस्य महासत्त्वस्य गृहिसंस्तवपरिवर्जनता। यदुत बुद्धक्षेत्रेण बुद्धक्षेत्रसंक्रमणता। उपपादुकता। प्रादुर्भावमण्डका वायुप्रावरणता। इयं बोधिसत्त्वस्य महासत्त्वस्य गृहिसंस्तवपरिवर्जनता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य भिक्षुणीसंस्तवपरिवर्जनता। यद्भिक्षुण्या- सार्द्धमेकं संघातमात्रं न तिष्ठति। न च तन्निदानं परितर्षणचित्तमुत्पादयति। न च तन्निदानं चीवरमुपादयति। इयं बोधिसत्त्वस्य महासत्त्वस्य भिक्षुणीसंस्तवपरिवर्जनता। तत्र कतमा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बोधिसत्त्वस्य महासत्त्वस्य कुलेषु मात्सर्य्यपरिवर्जनता। इह सुभूते बोधिसत्त्वेन महासत्त्वेनैकचित्तमुत्पादयितव्यम्। तन्मया सर्व्व-सत्त्वानां सुखोपधानं कर्त्तव्यम्। तदेते सत्त्वाः स्वपुण्यैरेव सुखिता नात्र मया मात्सर्य्यचित्तमुत्पाद्यम्। एवं बोधिसत्त्वेन महासत्त्वेन कुलमात्सर्य्यं परिवर्जयितव्यम्। तत्र कथं बोधिसत्त्वेन महासत्त्वेन संगणिकास्थानं परिवर्जयितव्यम्। यत्र बोधिसत्त्वस्य महासत्त्वस्य संगणिकास्थानस्थितस्य श्रावकप्रत्येकबुद्धा भवेयुः। तत्प्रतिसंयुक्ताः कथा भवेयुः। तत्प्रतिसंयुक्तावादचित्तोत्पादा उत्पद्येरन्। तत्र बोधिसत्त्वेन महासत्त्वेन न स्थातव्यम्। इयं बोधिसत्त्वस्य महासत्त्वस्य संगणिस्थानपरिवर्जनता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्यो-त्कर्षणपरिवर्जनता। तत्र कथं बोधिसत्त्वेन महासत्त्वेन व्यापादः परिवर्जयितव्यः। यद्व्यापाद विचिकित्साचित्तानामवकाशं न ददाति। कलहचित्तस्य विग्रहचित्तस्य वाऽवकाशं न ददातीतीयं बोधिसत्त्वस्य महासत्त्वस्य व्यापादपरिवर्जनता। या आत्मिकानां धर्म्माणामसमनुपश्यनता। इयं बोधिसत्त्वस्य महासत्त्वस्योत्कर्षण-परिवर्जनता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य परपंसनापरि-वर्जनता। यदुत वाह्यानां धर्म्माणामसमनुपश्यनता। इतीयं बोधि-सत्त्वस्य महासत्त्वस्य परपंसनता परिवर्जनता। तत्र कथं बोधि-सत्त्वेन महासत्त्वेन दशाऽकुशलाः कर्म्मपथाः परिवर्जयितव्याः। तथा ह्येते सुगतेरप्यन्तरायकराः प्रागेवार्य्यमार्गस्य प्रागेवाऽनुत्तरायाः सम्बोधेः। एवं बोधिसत्त्वेन महासत्त्वेन दशाऽकुशलाः कर्म्मपथाः परिवर्जयितव्याः। तत्र कथं बोधिसत्त्वेन महासत्त्वेनाधिमानः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिवर्जयितव्यः। समं समनुपश्यति कुतः पुनरधिकं येनाऽधिमन्येत एवमधिमानः परिवर्जयितव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन स्तम्भः परिवर्जयितव्यः। तथाहि स तद्वस्तुन समनुपश्यति। यचाऽस्य स्तम्भ उत्पद्येत। एवं बोधिसत्वेन महासत्त्वेन स्तम्भः परिवर्जयितव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन विपर्य्यासाः परिपर्जयितव्याः। वस्त्वनुपलब्धितामुपादाय। एवं बोधिसत्वेन महासत्त्वेन विपर्य्यासाः परिवर्जयितव्याः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन रागद्वेषमोहानाधिवासयितव्याः। तथा हि सरागद्वेषमोहानां वस्तुन समनुपश्यति। एवं बोधिसत्त्वेन महासत्त्वेन रागद्वेषमोहानाऽधिवासयितव्याः।

तत्र कतमे षष्ठ्यां भूमौ षट्धर्म्माः परिपूरयितव्याः। यदुत षट्पारमिताः। दानपारमिता, शीलपारमिता, क्षान्तिपारमिता, वीर्य्यपारमिता, ध्यानपारमिता, प्रज्ञापारमिता, परिपूरयितव्याः। तथा ह्यासु षट्सु पारमितासु, स्थित्वा बुद्धा भगवन्तः श्रावकप्रत्येकबुद्धाश्च पञ्चविधस्य ज्ञेयार्णवस्य पारङ्गता गच्छन्ति गमिष्यन्ति च। कतमस्य पञ्चविधस्य। यदुताऽतीतस्यानागतस्य प्रत्युत्पन्नस्यावक्तव्यस्याऽसंस्कृतस्य। एवं बोधिसत्त्वेन महासत्त्वेन षट्धर्म्माः परिपूरयितव्याः। तत्र कथं बोधिसत्त्वेन महासत्वेन श्रावकचित्तं परिवर्जयितव्यम्। तथा हि नैषमार्गो बोधये। प्रत्येकबुद्धचित्तं परिवर्जयितव्यम्। तथा हि नैषमार्गो बोधये। परितर्षणचित्तं नोत्पादयितव्यम्। तथा हि नैषमार्गो बोधये। याचनकं दृष्ट्वाः नाऽवलीनचित्तमुत्पादयितव्यम्। तत्कस्य हेतोस्तथा हि नैषमार्गो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बोधये। सर्व्ववस्तुनि वरित्यव्यता। न दुर्म्मनस्केन भवितव्यम्। तत्कस्य हेतोस्तथा हि। नैषमार्गो बोधये। प्रथमचित्तोत्पादमुपादाय। नित्यं दानं दातव्यम्। न सक्तचित्ते न भवितव्यम्। तत्र कथं बोधिसत्त्वेन महासत्त्वेनात्मग्रहो न कर्त्तव्यः। तथा हि अत्यन्ततया आत्मा न संविद्यते। जीवग्रहो न कर्त्तव्यः। तथा ह्यत्यन्ततया जीवो न संविद्यते। पुद्गलग्रहो न कर्त्तव्यस्तथा ह्यत्यन्ततया पुद्गलो न विद्यते। तत्र कथं बोधिसत्त्वेन महासत्त्वेन नोच्छेदग्रहो न कर्त्तव्यः स्तथा हि न कश्चिद्धर्म्म उच्छिद्यतेऽत्यन्ताऽनुपलम्भात् सर्व्वधर्म्माणां। तत्र कथं बोधिसत्त्वेन महासत्त्वेन शाश्वत ग्रहो न कर्त्तव्यः। तत्कस्यहेतोस्तथा हि धर्म्मा नोत्पद्यन्ते न शाश्वतो भवति नोच्छेदः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन निमित्तसंज्ञा न कर्त्तव्या। तथा ह्यत्यन्ततया संक्लेशो न संविद्यते। तत्र कथं बोधिसत्त्वेन महासत्त्वेन हेतुदृष्टिर्न कर्त्तव्या। तथा हि तां दृष्टिं न समनुपश्यति। तत्र कथं बोधिसत्त्वेन महासत्त्वेन नामरूपाऽभिनिवेशो न कर्त्तव्यः। तथा हि सतद्वस्तुन समनुपश्यति। तत्र कथं बोधिसत्त्वेन महासत्त्वेन स्कन्धाभिनिवेशो न कर्त्तव्यः। तथा ह्यत्यन्ततया स्कन्धा न संविद्यते। एवं स्कन्धाभिनिवेशो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन धात्वभिनिवेशो न कर्त्तव्यः। तथा ह्यत्यन्ततया धातवो न संविद्यन्ते। एवं धात्वभिनिवेशो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेनायतनाभिनिवेशो न कर्त्तव्यः। तथा ह्यत्यन्ततया आयतनानि न संविद्यन्ते। एवमायतनाऽभिनिवेशो न कर्त्तव्यः। तत्र कथं बोधिसत्वेन महा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्त्वेन त्रैधातुकाऽभिनिवेशो न कर्त्तव्यः। तथा ह्यस्य स्वभावेन संविद्यते। एवं बोधिसत्त्वेन महासत्त्वेन त्रैधातुकाभिनिवेशो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन त्रैधातुकाऽध्यवसानं न कर्त्तव्यम्। तथा हि तद्वस्तु न संविद्यते नोपलभ्यते। एवं बोधिसत्त्वेन महासत्त्वेन त्रैधातुकाध्यवसानं न कर्त्तव्यम्। तत्र कथं बोधिसत्त्वेन महासत्त्वेन त्रैधातुकालयो न कर्त्तव्यः। तथा हि तस्य वस्तुन संविद्यते एवं त्रैधातुकालयो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन त्रैधातुकनिश्रयो न कर्त्तव्यः। तथा हि तस्य तद्वस्तुन संविद्यते। एवं बोधिसत्त्वेन महासत्त्वेन त्रैधातुकनिश्रयो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन बुद्धनिश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः। तथा हि न बुद्धदृष्टिनिश्रयो बुद्धदर्शनम्। एवं बोधिसत्त्वेन महासत्त्वेन बुद्धनिश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन धर्म्मनिश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः। तथा हि न धर्म्मदृष्टिनिश्रयाद्धर्म्मदर्शनम्। एवं बोधिसत्त्वेन महासत्त्वेन धर्म्मनिश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन सङ्घनिश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः। तथा हि न सङ्घदृष्टिनिश्रयात् सङ्घदर्शनम्। एवं बोधिसत्त्वेन महासत्त्वेन सङ्घनिश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन शीलनिश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः। तथा हि न शीलदृष्टिनिश्रयाच्छीलपरिशुद्धिरेवं बोधिसत्त्वेन महासत्त्वेन शीलनिश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन शून्याधर्म्मा इति विषादो न कर्त्तव्यः। तथा हि सर्व्वधर्म्माः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वलक्षणेन शून्याः न शून्यतया। एवं बोधिसत्त्वेन महासत्त्वेन शून्यतायां विषादो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेनावरोधयितव्या। तथा हि सर्व्वधर्म्माः शून्या न शून्यताशून्यतां विरोधयति। एवं बोधिसत्त्वेन महासत्त्वेन शून्यता न विरोधयितव्या। तत्र कथं बोधिसत्त्वेन महासत्त्वेन शून्यतापरिपूरयितव्या। स्वलक्षणशून्यतापरिपूरिर्व्वोधिसत्त्वस्य महासत्त्वस्य शून्यतापरिपूरिः। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्यानिमित्त साक्षात्क्रिया। यदुत सर्व्वनिमित्तानाममनसिकारः। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्याऽप्रणिहितज्ञानं यत् स त्रैधातुकचित्तं न प्रवर्त्तते। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य त्रिमण्डलपरिशुद्धिः। यदुत दशकुशलकर्म्मपथपरिपूरिः। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य सत्त्वेषु कृपाकरुणतापरिपूरिः। यदुत महाकरुणाप्रतिलम्भः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन सत्त्वानाऽवगन्तव्याः। यदुत मैत्रीपरिपूर्य्या। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य सर्व्वधर्म्माणां समता दर्शनम्। यदुतानुक्षेपा प्रचयः। सर्व्वधर्म्माणां। तत्र कतमो बोधिसत्त्वस्य महासत्त्वस्य भूतनय प्रतिवेधः। यः सर्व्वधर्म्माणामेकनय प्रतिवेधः। अप्रतिवेधः। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्याऽनुत्पाद क्षान्तिः। या सर्व्वधर्म्माणामनुत्पादायाऽनिरोधयोऽनभिसंस्काराय क्षान्तिः। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्याऽनुत्पादज्ञानं। यन्नामरूपाऽनुत्पादज्ञानं। इदं बोधिसत्त्वस्य महासत्त्वस्यानुत्पादज्ञानं। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्यैकनयनिर्देशः। यथा असमुदाचारता। अयं बोधिसत्त्वस्य महासत्त्वस्यैकनय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निर्देशः। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य कल्पतासमुद्घातः। या सर्व्वधर्म्मा नाम विकल्पनता। तत्र कतमो बोधिसत्त्वस्य महासत्त्वस्य दृष्टिविवर्त्तः। या श्रावकभूमेः प्रत्येकबुद्धभूमेश्च दृष्टिविवर्त्तनता। तत्र कतमो बोधिसत्त्वस्य महासत्त्वस्य क्लेशविवर्त्तः। यः सर्व्ववासनाऽनुसन्धिक्लेशच्चयः। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य शमथविपश्यनाभूमिः। यदुत सर्व्वाकारज्ञताज्ञानं। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य दान्तचित्तता। यत्र त्रैधातुकैरतिविन्दति। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य शान्तचित्तता। याषण्णामिन्द्रियाणां प्रतिसंहरणता। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्याऽप्रतिहतज्ञानं। यदुत बुद्धचक्षुः प्रतिलम्भः। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्यानूनया च सर्व्वज्ञतया षड़ायतनापेक्षा। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य यत्रेच्छाक्षेत्रगमनं। यत्र तत्र पर्षण्मण्डल आत्मभावदर्शनं। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य सर्व्वसत्त्वचित्ताऽनुप्रवेशः। यदेकचित्तेन सर्व्वसत्त्वानां चित्तचैतसिकानि प्रतिजानाति। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्याऽभिज्ञा विक्रीड़ता। याभिराभिज्ञाभिर्व्विक्रीड़न् बुद्धक्षेत्राद्बुद्धक्षेत्रं संक्रामति। बुद्धदर्शनाय न चाऽस्य बुद्धसंज्ञा भवति। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य बुद्धक्षेत्रदर्शनं। यदेकस्मिन्नेव बुद्धक्षेत्रे स्थिताऽपरिमाणानि बुद्धक्षेत्राणि पश्यति। न चाऽस्य बुद्धक्षेत्रसंज्ञा भवति। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य यथादृष्टि बुद्धक्षेत्रपरिनिष्पादनता। यस्त्रिसाहस्रमहासाहस्रलोकधात्वीश्वरचक्रवर्त्तिभूमौ स्थिता त्रिसाहस्रमहासाहस्रलोकधातोः परित्यजनं तेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चासनता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य बुद्धपर्य्युपासनता। या धर्म्मपर्य्युपासनता सर्व्वसत्त्वाऽनुग्रहं प्रति। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य बुद्धकाय यथाभूतप्रत्यवेक्षणता। या धर्म्मकाययथाभूतप्रत्यवेक्षणता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्येन्द्रिय परापरज्ञानता। या दशकुशलेषु स्थित्वा सर्व्वसत्त्वानामिन्द्रियपरिपूरिप्रजाननता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य बुद्धक्षेत्रपरिशोधनता। या सत्त्वचित्तपरिशोधनताऽनुपलम्भयोगेन। तत्र कतमो बोधिसत्त्वस्य महासत्त्वस्य मायोपमः समाधिः। यत्र समाधौ स्थित्वा बोधिसत्त्वो महासत्त्वः सर्व्वाः क्रियाः करोति। न चाऽस्यचित्तं क्वचिद्धर्म्मे प्रवर्त्तते। तत्र कतमो बोधिसत्त्वस्य महासत्त्वस्याऽभीक्ष्णं समापद्यनता। यद्बोधिसत्त्वस्य महासत्त्वस्य विपाकजः समाधिः। तत्र कथं बोधिसत्त्वो महासत्त्वो यथा यथा संज्ञानां कुशलमूलपरिनिष्पत्तिर्भवति। तथा तथात्मभावं परिनिष्पादयति। इह बोधिसत्त्वो महासत्त्वः सञ्चिन्त्यात्मभावं परिगृह्णाति। यथा यथा सत्त्वपरिपाको भवति। तत्र कथं बोधिसत्त्वो महासत्त्वः सञ्चिन्त्यात्मभावमुपादत्ते। यदुत सर्व्वसत्त्वपरिपाकः। तत्र कथं बोधिसत्त्वो महासत्त्वो यथा यथा प्रणिदधाति। तथा तथाऽस्य समृध्यति। इदं बोधिसत्त्वो महासत्त्वः षण्णां पारमितानां परिपूर्णत्वाद्यथा यथा प्रणिदधाति तथा तथा समृध्यति।

तत्र कथं बोधिसत्त्वो महासत्त्वो देवनागयक्षगन्धर्व्वाऽसुरगरुड़किन्नरमहोरगरुतज्ञानं प्रतिविध्यति। यदुत निरुक्तिप्रतिसंविदा। तत्र कथं बोधिसत्त्वो महासत्त्वः परिपूर्णप्रतिभानिर्देशज्ञानं प्रति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विध्यति। यदुत प्रतिभानसंविदा। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य गर्भावक्रान्तिसम्पत्। इह सुभूते बोधिसत्त्वो महासत्त्वः सर्व्वासु जातिषूपपादुक उपपद्यते। इह बोधिसत्त्वस्य महासत्त्वस्य गर्भावक्रान्तिसम्पत्। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य कुलसम्पत्। यद्बोधिसत्त्वो महासत्त्वो महाकुलेषु प्रत्याजायते। इयं बोधिसत्त्वस्य महासत्त्वस्य कुलसम्पत्। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य जातिसम्पत्। यद्बोधिसत्त्वो महासत्त्वः क्षत्रियमहासालकुलेषु वा ब्राह्मणमहासालकुलेषु वा प्रत्याजायते। इयं बोधिसत्त्वस्य महासत्त्वस्य जातिसम्पत्। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य गोत्रसम्पत्। यद्बोधिसत्त्वो महासत्त्वो यतो गोत्रात् पौर्व्वका बोधिसत्त्वो अभूवन्। तत्र गोत्रे प्रत्याजायते। इयं बोधिसत्त्वस्य महासत्त्वस्य गोत्रसम्पत्। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य परिवारसम्पत्। यद्बोधिसत्त्वो महासत्त्वो बोधौसत्त्वान् प्रतिष्ठाप्य बोधिसत्त्वापरिचार एव भवति। इयं बोधिसत्त्वस्य महासत्त्वस्य परिचारसम्पत्। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य जन्मसम्पत्। यद्बोधिसत्त्वो महातत्त्वो जातमात्र एवाऽसंख्येय लोकधातूनवभासेन स्फुरति। तांश्च षड्विकारं प्रकम्पयति। इयं बोधिसत्त्वस्य महासत्त्वस्य जन्मसम्पत्। तत्र कतमा बोधिसत्त्वस्य महासत्त्वाऽभिक्रमणसम्पत्। यद्बोधिसत्त्वो महासत्त्वः प्रव्रज्यायैणिष्क्रामति। अनेकैः सत्त्वकोटीनियुतशतसहस्रैः सार्द्धं ते च सत्त्वा नियता भवन्ति। त्रिषु यानेषु। इयं बोधिसत्त्वस्य महासत्त्वस्याऽभिनिष्क्रमणसम्पत्। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य बोधिवृक्षव्यूहसम्पत्। यद्बोधिसत्त्वो महा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्त्वो बोधिवृक्षमूलं सुवर्णमयं भवति। स्कन्धो वैदूर्य्यमयः। सप्त-रत्नमय्यः शाखाः सर्व्वरत्नमयानि पत्रपुष्पाणि यस्य वृक्षस्य पुष्पो गन्धोऽवभासाश्चानन्ताल्लोकधातून् स्फुरति। इमं बोधिसत्त्वस्य महासत्त्वस्य बोधिवृक्षव्यूहसम्पत्। तत्र कतमा बोधिसत्त्वस्य महा-सत्त्वस्य सर्व्वगुणपरिपूरिसम्पत्। या बोधिसत्त्वस्य महासत्त्वस्य सत्त्व-परिपाकविशुद्धिश्च बुद्धक्षेत्रपरिशुद्धिश्च। इयं बोधिसत्त्वस्य महा-सत्त्वस्य सर्व्वगुणपरिपूरिसम्पत्। तत्र कथं बोधिसत्त्वो महासत्त्वो दशम्यां भूमौ स्थितस्तथागत एव वक्तव्यः। यस्य बोधिसत्त्वस्य महासत्त्वस्य सर्व्वपारमिताः परिपूर्णा भवन्ति। दश तथागत-बलानि चत्वारि वैशारद्यानि चतस्रः प्रतिसम्विदः। अष्टादशा-वेणिका बुद्धधर्म्माः। सर्व्वाकारज्ञता ज्ञानं सर्व्ववासनाऽनुसन्धि क्लेशप्रहानं। महाकरुणा। सर्व्वबुद्धधर्म्माश्च परिपूर्णा भवन्ति। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वो दशम्यां भूमौ स्थितस्तथागत एव वक्तव्यः। तत्र कतमा सुभूते बोधिसत्त्वस्य महासत्त्वस्य दश-भूमयः। इह सुभूते बोधिसत्त्वो महासत्त्व उपायकौशलेन दान-पारमितायां चरन् शीलपारमितायां चरन् क्षान्तिपारमितायां चरन् वीर्य्यपारमितायां चरन् ध्यानपारमितायां चरन् प्रज्ञापार-मितायाश्चरन्। अध्यात्मशून्यतायां चरन् बहिर्द्धाशून्यतायां चरन् अध्यात्मबहिर्द्धाशून्यतायां चरन् शून्यताशून्यतायां चरन् महाशून्य-तायां चरन् परमार्थशून्यतायां चरन् संस्कृतशून्यतायां चरन् असंस्कृतशून्यतायां चरन् अत्यन्तशून्यतायां चरन् अनवराग्रशून्य-तायां चरन् अनवकारशून्यतायां चरन् प्रकृतिशून्यतायां चरन्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्व्वधर्म्म शून्यतायां चरन् स्वलक्षणशून्यतायां चरन् अनुपलम्भ-शून्यतायां चरन् अभावशून्यतायां चरन् स्वभावशून्यतायां चरन् अभावस्वभाव शून्यतायां चरन् स्मृत्यूपस्थानेषु चरन् सम्यक्प्रहाणेषु चरन् ऋद्धिपादेषु चरन् इन्द्रियेषु चरन् बलेषु चरन् बोध्यङ्गेषु चरन् आर्य्याष्टाङ्गमार्गे चरन् आर्य्यसत्येषु चरन् ध्यानेषु चरन् अप्रमाणेषु चरन् आरुप्यसमापत्तिषु चरन् विमोक्षेषु चरन् अनुपूर्व्व विहार समापत्तिषु चरन् शून्यतानिमित्ताप्रणिहित-विमोक्षेषु चरन् अभिज्ञासु चरन् धारनीमुखेषु चरन् समाधिषु चरन् तथागतबलेषु चरन् चतुर्षु वैशारद्येषु चरन् चतुःप्रतिसम्वित्सु चरन् महामैत्र्ये चरन् महाकरुणायां चरन् अष्टादशस्वावेणि-कबुद्धधर्म्मेषु चरन् शुक्लविपश्यनाभूमिमतिक्रामति । गोत्रभूमिं समतिक्रामति । अष्टमकभूमिं समतिक्रामति । दर्शनभूमिं समति-क्रामति । तनुभूमिं समतिक्रामति । वीतरागभूमिं समतिक्रामति । कृताविभूमिं समतिक्रामति । प्रत्येक बुद्धभूमिं समतिक्रामति । बोधिसत्वभूमिं समतिक्रामति । इह सुभूते बोधिसत्वोमहासत्त्वो नवभूमिरतिक्रामति । बुद्धभूमौ तिष्ठति । इह सुभूते बोधिसत्त्वस्य महासत्त्वस्य दशभूमयः । एवं खलु सुभूते बोधिसत्त्वो महासत्वो महायानं संप्रस्थितो वेदितव्यः ।

यत् पुनः सुभूतिरेव माह । कुतस्तद्यानं निर्यास्यतीति । त्रैधातुकान्निर्य्यास्यति । येन सर्व्वाकारज्ञता तेन स्थास्यति । तत् पुनरद्वययोगेन । तत् कस्य हेतो स्तथाहि सुभूते यच्च महायानं या च सर्व्वाकारज्ञता उभावेतौ धर्म्मौ न विसंयुक्तौ संयुक्तावरूपिणा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वनिदर्शनावप्रतिघातैकलक्षणौ । तत् कस्य हेतोः । न हि सुभूते अलक्षणा धर्म्मानिर्यान्ति वा निर्यास्यति वा निर्याता वा धर्म्मधातोः । स सुभूते निर्याणमिच्छेद्यः अलक्षणानां धर्म्माणां निर्याणमिच्छेत् । तथतायाः स सुभूते निर्याणमिच्छेद्योऽवितथतायाः सुभूते निर्याणमिच्छेत् । भूतकोटेः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । अचिन्त्यधातोः स सुभूतेनिर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । आकाशधातोः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । रागक्षयधातोः स सुभूतेनिर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । प्रहाणधातोः स सुभूतेनिर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । विरागधातोः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । निरोधधातोः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । रूपशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । वेदनाशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । संज्ञाशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । संस्कार शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । विज्ञान शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । तत् कस्य हेतोर्नहि सुभूते रूपशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । न वेदनाशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । न संज्ञाशून्यता त्रैधातुकान्निर्याति । न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्व्वाकारज्ञतायां तिष्ठति। न संस्कार शून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न विज्ञानशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत् कस्य हेतोस्तथाहि। स सुभूते रूपं रूपेण शून्यं। वेदना वेदनयाशून्या। संज्ञा संज्ञयाशून्या। संस्काराः संस्कारैः शून्या। विज्ञानं विज्ञानेन शून्यं। चक्षुः शून्यतायाः स सुभूते निर्यातामिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। श्रोत्र शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। घ्राण शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। जिह्वा शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। काय शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। मनः शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत् कस्य हेतोर्नहि सुभूते चक्षुः शून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञातायां तिष्ठति। न श्रोत्रशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न घ्राणशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न जिह्वाशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न कायशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न मनः शून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत् कस्य हेतोस्तथाहि सुभूते चक्षुःश्चक्षुषा शून्यं। श्रोत्रं श्रोत्रेण शून्यं। घ्राणं घ्राणेन शून्यं। जिह्वा जिह्वया शून्या। कायः कायेन शून्यः। मनो मनसा शून्यं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। शब्दशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। गन्धशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। रसशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। स्पर्शशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। धर्म्मशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत् कस्य हेतोर्नहि सुभूते रूपशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न शब्दशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न गन्धशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न रसशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न स्पर्शशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न धर्म्मशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत् कस्य हेतोस्तथाहि सुभूते रूपं रूपेण शून्यं शब्दः शब्देन शून्यः गन्धो गन्धेन शून्यः रसो रसेन शून्यः स्पर्शः स्पर्शेन शून्यः धर्म्माः धर्म्मैः शून्याः।

चक्षुर्व्विज्ञानशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। श्रोत्रविज्ञानशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। घ्राणविज्ञानशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। जिह्वा विज्ञानशून्यतायाः स सुभूते निर्याणमि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। काय विज्ञानशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्यानमिच्छेत्। मनो विज्ञानशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्यानमिच्छेत्। तत् कस्य हेतोर्नहि सुभूते चक्षुर्व्विज्ञानशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न श्रोत्रविज्ञानशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न घ्राणविज्ञानशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न जिह्वा विज्ञानशून्यता त्रैधातुकान्निर्याति। सर्व्वाकारज्ञतायां तिष्ठति। न कायविज्ञानशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न मनोविज्ञानशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत् कस्य हेतोस्तथाहि सुभूते चक्षुर्व्विज्ञानं चक्षुर्व्विज्ञानेन शून्यं। श्रोत्रविज्ञानं श्रोत्रविज्ञानेन शून्यं। घ्राणविज्ञानं घ्राणविज्ञानेन शून्यं। जिह्वाविज्ञानं जिह्वाविज्ञानेन शून्यं। कायविज्ञानं कायविज्ञानेन शून्यं। मनोविज्ञानं मनोविज्ञानेन शून्यं।

चक्षुः संस्पर्शशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। श्रोत्रसंस्पर्शशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। घ्राणसंस्पर्शशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। जिह्वा संस्पर्शशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। कायसंस्पर्शशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनः संस्पर्शशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत् कस्य हेतोर्नहि सुभूते चक्षुः संस्पर्शशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न श्रोत्रसंस्पर्शशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न घ्राणसंस्पर्शशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न जिह्वासंस्पर्शशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न कायसंस्पर्शशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न मनः संस्पर्शशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत् कस्य हेतोस्तथाहि सुभूते चक्षुः संस्पर्शश्चक्षुः संस्पर्शेन शून्यः। श्रोत्रसंस्पर्शः श्रोत्रसंस्पर्शेन शून्यः। घ्राणसंस्पर्शो घ्राणसंस्पर्शेन शून्यः। जिह्वासंस्पर्शो जिह्वासंस्पर्शेन शून्यः। कायसंस्पर्शः कायसंस्पर्शेन शून्यः। मनः संस्पर्शो मनः संस्पर्शेन शून्यः।

चक्षुः संस्पर्श प्रत्ययवेदनायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। श्रोत्रसंस्पर्श प्रत्ययवेदनायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। घ्राणसंस्पर्शप्रत्ययवेदनायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। जिह्वासंस्पर्शप्रत्ययवेदनायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। कायसंस्पर्शप्रत्ययवेदनायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। मनः संस्पर्शप्रत्ययवेदनायाः स सुभूते निर्याणमिच्छेत् योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत् कस्य हेतोर्नहि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चक्षुःसंस्पर्शप्रत्ययवेदना त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न श्रोत्रसंस्पर्शप्रत्ययवेदना त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न घ्राणसंस्पर्शप्रत्ययवेदना त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न जिह्वासंस्पर्शप्रत्ययवेदना त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न कायसंस्पर्शप्रत्ययवेदना त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न मनःसंस्पर्शप्रत्ययवेदना त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत्कस्य हेतोस्तथा हि सुभूते चक्षुःसंस्पर्शप्रत्ययवेदना चक्षुःसंस्पर्शप्रत्ययवेदनया शून्या। श्रोत्रसंस्पर्शप्रत्ययवेदना श्रोत्रसंस्पर्शप्रत्ययवेदनया शून्या। घ्राणसंस्पर्शप्रत्ययवेदना घ्राणसंस्पर्शप्रत्ययवेदनया शून्या। जिह्वासंस्पर्शप्रत्ययवेदना जिह्वासंस्पर्शप्रत्ययवेदनया शून्या। कायसंस्पर्शप्रत्ययवेदना कायसंस्पर्शप्रत्ययवेदनया शून्या। मनःसंस्पर्शप्रत्ययवेदना मनःसंस्पर्शप्रत्ययवेदनया शून्या।

स्वप्नस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। मायायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। मरीच्याः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। प्रतिश्रुत्कायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। प्रतिभासस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तथागतनिर्म्मितस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत्कस्य हेतोर्न हि सुभूते स्वप्नस्य स्वभावस्त्रैधा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न मायायाः स्वभावस्त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न मरीच्याः स्वभावस्त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न प्रतिश्रुत् काया: स्वभावस्त्रैधातुकन्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न प्रतिभासस्य स्वभावस्त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न तथागतनिर्म्मितस्य स्वभावस्त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत्कस्य हेतोस्तथा हि सुभूते स्वप्नस्वभावः स्वप्नस्वभावेन शून्यः। मायास्वभावो मायास्वभावेन शून्यः। मरीचिस्वभावो मरीचिस्वभावेन शून्यः। प्रतिश्रुत्कास्वभावः प्रतिश्रुत्कास्वभावेन शून्यः। प्रतिभासस्वभावः प्रतिभासस्वभावेन शून्यः। तथागत निर्म्मितस्वभावस्तथागत निर्म्मितेन शून्यः।

दानपारमितायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। शीलपारमितायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। क्षान्तिपारमितायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। वीर्य्यपारमितायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। ध्यानपारमितायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। प्रज्ञापारमितायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत्कस्य हेतोस्तथा हि सुभूते दानपारमितायाः स्वभावो न त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यः शीलपारमितायाः स्वभावो न स त्रैधातुकान्निर्याति। यः क्षान्तिपारमितायाः स्वभावो न स त्रैधा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो वीर्य्यपारमिताया: स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो ध्यानपारमितायाः स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यः प्रज्ञापारमितायाः स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत्कस्य हेतोस्तथाहि सुभूते दानपारमितायाः स्वभावो दानपारमितास्वभावेन शून्यः। शीलपारमितायाः स्वभावः शीलपारमितास्वभावेन शून्यः। क्षान्तिपारमितायाः स्वभावः क्षान्तिपारमितास्वभावेन शून्यः। वीर्य्यपारमितायाः स्वभावो वीर्य्यपारमितास्वभावेन शून्यः। ध्यानपारमितायाः स्वभावो ध्यानपारमितास्वभावेन शून्यः। प्रज्ञापारमितास्वभावः प्रज्ञापारमितास्वभावेन शून्यः।

अध्यात्मशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। बहिर्द्धाशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। अध्यात्मबहिर्द्धाशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। शून्यताशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। महाशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। परमार्थशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। संस्कृतशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। असंस्कृतशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। अत्यन्तशून्यतायाः स सुभूते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । अनवराग्रशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । अनवकारशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । प्रकृतिशून्यतायाः स सुभूते निर्य्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । सर्व्वधर्म्मशून्यतायाः स सुभूते निर्याणमिच्छेत् योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । स्वलक्षणशून्यतायाः स सुभूते निर्याणमिच्छद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । अनुपलम्भशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । अभावशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । स्वभावशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । अभावस्वभावशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । तत् कस्य हेतोर्नहि सुभूते ऽध्यात्मशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । न बहिर्द्धाशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । नाऽध्यात्मबहिर्द्धाशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । न शून्यताशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । न महाशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । न परमार्थशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । न संस्कृतशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । नाऽसंस्कृतशून्यता त्रैधातुकान्नि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

र्याति। न सर्व्वाकारज्ञतायां तिष्ठति। नात्यन्तशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। नाऽनवराग्रशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। नाऽनवकारशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न प्रकृतिशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न सर्व्वधर्म्मशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न स्वलक्षणशून्यता त्रैधातुकान्निर्याति न सर्व्वाऽकारज्ञतायां तिष्ठति। नाऽ नुपलम्भशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। नाऽ भावशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न स्वभावशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। नाऽ भावस्वभावशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति।

तत् कस्य हेतोस्तथाहि सुभूते ऽध्यात्मशून्यता ऽध्यात्मशून्यतया शून्या। बहिर्द्धाशून्यता बहिर्द्धाशून्यतयाशून्या। अध्यात्म बहिर्द्धाशून्यता ऽध्यात्मबहिर्द्धाशून्यतया शून्या। शून्यताशून्यता शून्यतया शून्या। महाशून्यता महाशून्यतया शून्या। परमार्थशून्यता परमार्थशून्यतया शून्या। संस्कृतशून्यता संस्कृतशून्यतया शून्या। असंस्कृतशून्यता ऽसंस्कृतशून्यतया शून्या। अत्यन्तशून्यता अत्यन्तशून्यतया शून्या। अनवराग्रशून्यता अनवराग्रशून्यतया शून्या। अनवकारशून्यता अनवकारशून्यतया शून्या। प्रकृतिशून्यता प्रकृतिशून्यतया शून्या। सर्व्वधर्म्मशून्यता सर्व्वधर्म्मशून्यतया शून्या।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वलक्षणशून्यता स्वलक्षणशून्यतया शून्या । अनुपलम्भशून्यता अनुपलम्भशून्यतया शून्या। अभावशून्यता अभावशून्यतया शून्या। स्वभावशून्यता स्वभावशून्यतया शून्या। अभावस्वभावशून्यता अभावस्वभावशून्यतया शून्या ।

स्मृत्युपस्थानानां सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । सम्यक्प्रहाणानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । ऋद्धिपादानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां निर्याणमिच्छेत् । इन्द्रियाणां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । बलाणां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । वोध्यङ्गानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । आर्य्याष्टाङ्गमार्गस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । तत् कस्य हेतोस्तथाहि सुभूते यः स्मृत्युपस्थानानां स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । यः सम्यक्प्रहाणानां स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायाः तिष्ठति । य ऋद्धिपादानां स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । यऽ इन्द्रियाणां स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । यो बलाणां स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । यो बोध्यङ्गाणां स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । योमार्गस्य स्वभावो न स त्रैधातुकान्निर्याति । न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्व्वाकारज्ञतायां तिष्ठति । तत् कस्य हेतोस्तथाहि । स्मृत्युपस्थान स्वभावः स्मृत्युपस्थानस्वभावेन शून्यं । सम्यक्प्रहाणस्वभावः सम्यक्प्रहाणस्वभावेन शून्यः । ऋद्धिपादस्वभाव ऋद्धिपादस्वभावेन शून्यः । इन्द्रियस्वभावः इन्द्रियस्वभावेन शून्यः । बलस्वभावो बलस्वभावेन शून्यः । बोध्यङ्गस्वभावो बोध्यङ्गस्वभावेन शून्यः । मार्गस्वभावो मार्गस्वभावेन शून्यः ।

आर्य्यसत्यानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । ध्यानानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । अप्रमाणानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । आरूप्य समापत्तीनां स निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । विमोक्षाणां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । न वाऽनुपूर्व्वविहार समापत्तीनां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । आनिमित्तस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । अप्रणिहितस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । तत् कस्य हेतोस्तथाहि सुभूते य आर्य्यसत्यानां स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । यो ध्यानानां स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । यो ऽप्रमाणानां स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । य आरूप्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समापत्तीनां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकार-ज्ञतायां तिष्ठति। योऽष्टानां विमोक्षाणां स्वभावो न स त्रैधा-तुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो नवा ऽनुपूर्व्वविहार समापत्तीनां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यः शून्यतायाः स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो ऽप्र-माणहितस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत् कस्य हेतोस्तथाहि सुभूते आर्य्यसत्यस्य स्वभाव आर्य्यसत्यस्वभावेन शून्यः। ध्यानस्वभावो ध्यानस्वभावेन शून्यः। अप्रमाणस्वभावो ऽप्रमाणस्वभावेन शून्यः। आरूप्यसमापत्ति-स्वभाव आरूप्यसमापत्तिस्वभावेन शून्यः। विमोक्षस्वभावो विमोक्षस्वभावेन शून्यः। नवाऽनुपूर्व्वविहार स्वभावो नवा ऽनुपूर्व्वविहारस्वभावेन शून्यः। शून्यतास्वभावः शून्यता स्वभावेन शून्यः। आनिमित्त स्वभाव आनिमित्त स्वभावेन शून्यः। अप्रणिहितस्वभावो ऽप्रणिहितस्वभावेन शून्यः।

अभिज्ञानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। समाधीनां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। धारणीमुखानां स सुभूते निर्याण-मिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत् कस्य हेतो-स्तथाहि सुभूते यो ऽभिज्ञानां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यः समाधीनां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो धारणी-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुखानां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत् कस्य हेतोस्तथाहि सुभूते अभिज्ञास्वभावो ऽभिज्ञास्वभावेन शून्यः। समाधिस्वभावः समाधिस्वभावेन शून्यः। धारणीमुखस्वभावो धारणीमुखस्वभावेन शून्यः।

दशानां तथागतबलानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। चतुर्णां वैशारद्यानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। चतसृणां प्रतिसम्विदां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। अष्टादशानामावेणिक बुद्धधर्म्माणां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत् कस्य हेतोस्तथाहि सुभूते यो दशानां तथागतबलाणां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यश्चतुर्णां वैशारद्याणां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। य श्चतसृणां प्रतिसम्विदां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो ऽष्टादशानामावेणिकबुद्धधर्म्माणां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत् कस्य हेतोस्तथाहि। सुभूते तथागमबलस्वभावस्तथागतबल स्वभावेन शून्यः। वैशारद्यस्वभावो वैशारद्यस्वभावेन शून्यः। प्रतिसम्वित्स्वभावः प्रतिसम्वित्स्वभावेन शून्यः। आवेणिक बुद्धधर्म्मस्वभाव आवेणिक बुद्धधर्म्म स्वभावेन शून्यः।

अर्हतः सुभूते क्षीणास्रवस्योत् पत्तिमिच्छेद्योऽलक्षणानां धर्म्माणां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निर्याणमिच्छेत् । प्रत्येकबुद्धस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । बोधिसत्त्वस्य महासत्त्वस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । तथागतस्यार्हतः सम्यक्सम्बुद्धस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । तत्कस्यहेतोस्तथाहि सुभूते योर्हतः सम्यक् सम्बुद्धस्य स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । यः प्रत्येकबुद्धस्य स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । यो बोधिसत्त्वस्य महासत्त्वस्य स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । यस्तथागतस्यार्हतः सम्यक्सम्बुद्धस्य स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । तत्कस्य हेतोस्तथा हि सुभूते अर्हत् स्वभावोऽर्हत् स्वभावेन शून्यः । प्रत्येकबुद्धस्वभावः प्रत्येकबुद्धस्वभावेन शून्यः । बोधिसत्त्वस्वभावो बोधिसत्त्वस्वभावेन शून्यः । तथागतस्वभावस्तथागतस्वभावेन शून्यः ।

स्रोत आपत्तिफलस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । सकृदागामिफलस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । अनागामिफलस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् अर्हत्वस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । प्रत्येकबोधेः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । मार्गाकारज्ञतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । सर्व्वाकारज्ञतायाः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत्कस्य हेतोस्तथा हि सुभूते यः स्रोत आपत्तिफलस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यः सकृदागामिफलस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। योऽनागामिफलस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। योऽर्हत्वस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यः प्रत्येकबोधः स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो मार्गाकारज्ञतायाः स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यः सर्व्वाकारज्ञतायाः स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत्कस्य हेतोस्तथा हि सुभूते स्रोत आपत्तिफलस्वभावः स्रोत आपत्तिफलस्वभावेन शून्यः। सकृदागामिफलस्वभावः सकृदागामिफलस्वभावेन शून्यः। अनागामिफलस्वभावोऽनागामिफलस्वभावेन शून्यः। अर्हत्वस्वभावोऽर्हत्वस्वभावेन शून्यः। प्रत्येकबोधिस्वभावः प्रत्येकबोधिस्वभावेन शून्यः। मार्गाकारज्ञतास्वभावो मार्गाकारज्ञतास्वभावेन शून्यः। सर्व्वाकारज्ञतास्वभावः सर्व्वाकारज्ञतास्वभावेन शून्यः।

शब्दः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। निमित्तस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। सङ्केतस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। व्यवहारस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। प्रज्ञप्तेः स

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत्कस्य हेतोस्तथा हि नामशून्यता नामशून्यतास्वभावेन शून्या। निमित्तशून्यता निमित्तशून्यतास्वभावेन शून्या। सङ्केतशून्यता सङ्केतशून्यतास्वभावेन शून्या। व्यवदानशून्यता व्यवदानशून्यतास्वभावेन शून्या। प्रज्ञप्तिशून्यता प्रज्ञप्तिशून्यतास्वभावेन शून्या।

अनुत्पादस्य सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। अनिरोधस्य सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। संक्लेशस्य सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। व्यवदानस्य सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। अनभिसंस्कारस्य सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत्कस्य हेतोस्तथाहि योऽनुत्पादस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। योऽनिरोधस्वभावो न स त्रैधातुन्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यः संक्लेशस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो व्यवदानस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। योऽनभिसंस्कारस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत्कस्य हेतोस्तथाहि। अनुत्पादस्वभावोऽनुत्पादस्वभावेन शून्यः। निरोधस्वभावो निरोधस्वभावेन शून्यः। संक्लेशस्वभावः संक्लेशस्वभावेन शून्यः। व्यवदानस्वभावो व्यवदानस्वभावेन शून्यः। अनभिसंस्कारस्वभावोऽनभिसंस्कारस्वभावेन शून्यः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदनेनापि ते सुभूते पर्य्यायेणैवं वेदितव्यम् । महायानं त्रैधातुकान्निर्याति । येन सर्व्वाकारज्ञता तेन यास्यत्यचाल्यतत् स्थानं । यत्पुनः सुभूतिरेवमाह । क्व तद्यानं स्थास्यतीति । न क्वचित्तद्यानं स्थास्यति । तत्कस्य हेतोस्तथा ह्यस्थिताः सर्व्वधर्म्माः प्रतिष्ठाऽनुपलब्धितः । अपि तु खलु पुनः सुभूते अस्थानस्थान-योगेन तद्यानं स्थास्यति । तद्यथापि नामसुभूते धर्म्मधातुर्न स्थितो नाऽस्थितः । एवमेव सुभूते तद्यानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते तथता न स्थिता नाऽस्थिता । एवमेव सुभूते तद्यानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते भूतकोटिर्न स्थिता नाऽस्थिता । एवमेव तद्यानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूतेऽचिन्त्यधातुर्न स्थितो नाऽस्थितः । एवमेव तद्यानं न स्थितं नाऽस्थितं । तत्कस्य हेतोर्न हि सुभूते धर्म्मधातुस्वभावः स्थितो वाऽस्थितो वा । न तथतायाः स्वभावः स्थितो वाऽस्थितो वा । न भूतकोटेः स्वभावः स्थितो वाऽस्थितो वा । नाऽचिन्त्यधातुस्वभावः स्थितो वाऽस्थितो वा । तत्कस्य हेतोस्तथा हि सुभूते । धर्म्मधातु-स्वभावो धर्म्मधातुस्वभावेन शून्यः । तथता स्वभावस्तथता स्वभावेन शून्यः । भूतकोटेः स्वभावो भूतकोटिस्वभावेन शून्यः । अचिन्त्यधातु-स्वभावोऽचिन्त्यधातुस्वभावेन शून्यः । तद्यथापि नाम सुभूते आकाशधातुर्न स्थितो नाऽस्थितः । एवमेव सुभूते तद्यानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते रागक्षयधातुर्न स्थितो नाऽ-स्थितः । एवमेव सुभूते तद्यानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते प्रहाणधातुर्न स्थितो नाऽस्थितः । एवमेव सुभूते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्यानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते विरागधातुर्न स्थितो नाऽस्थितः। एवमेव सुभूते यद्यानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते निरोधधातुर्न स्थितो नाऽस्थितः। एवमेव सुभूते तद्यानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते। आकाशधातुः स्थितो वाऽस्थितो वा। न रागक्षयधातुस्वभावः स्थितो वाऽस्थितो वा। न प्रहाणधातुस्वभावः स्थितो वाऽस्थितो वा। न विरागधातुस्वभावः स्थितो वाऽस्थितो वा। न निरोधधातु-स्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि सुभूते आकाशधातुस्वभाव आकाशधातुस्वभावेन शून्यः। रागक्षयधातु-स्वभावो रागक्षयधातुस्वभावेन शून्यः। प्रहाणधातुस्वभावः प्रहाण-धातुस्वभावेन शून्यः। विरागधातुस्वभावो विरागधातुस्वभावेन शून्यः। निरोधधातुस्वभावो निरोधधातुस्वभावेन शून्यः।

तद्यथापि नाम सुभूते रूपशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते वेदनाशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महा-यानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते संज्ञाशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं। न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते संस्कारशून्यता न स्थिता नाऽस्थिता। एव-मेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते विज्ञानशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोस्तथाहि सुभूते न रूपस्वभावः स्थितो वाऽस्थितो वा। न वेदनास्वभावः स्थितो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वाऽस्थितो वा। न संज्ञास्वभावः स्थितो वाऽस्थितो वा। न संस्कार-स्वभावः स्थितो वाऽस्थितो वा। न विज्ञानस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि। रूपं रूपेण शून्यं वेदना वेदनया शून्या। संज्ञा संज्ञया शून्या। संस्काराः संस्कारैः शून्याः। विज्ञानं विज्ञानेन शून्यम्।

तद्यथापि नाम सुभूते चक्षुः शून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते श्रोत्रशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महा-यानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते घ्राणशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते जिह्वाशून्यता न स्थिता नाऽस्थिता। एव-मेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते कायशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते मनः शून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते चक्षुःस्वभावः स्थितो वाऽस्थितो वा। न श्रोत्रस्वभावः स्थितो वाऽस्थितो वा। न घ्राणस्वभावः स्थितो वाऽस्थितो वा। न जिह्वास्वभावः स्थितो वाऽस्थितो वा। काय-स्वभावः स्थितो वाऽस्थितो वा। मनःस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि चक्षुश्चक्षुषा शून्यं श्रोत्रं श्रोत्रेण शून्यं। घ्राणं घ्राणेन शून्यं। जिह्वा जिह्वया शून्या कायः कायेन शून्यः। मनो मनसा शून्यं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्यथापि नाम सुभूते रूपशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते शब्दशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते गन्धशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते रसशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते स्पर्शशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते धर्मशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तत्कस्य हेतोर्न हि सुभूते रूपस्वभावः स्थितो वाऽस्थितो वा । न शब्दस्वभावः स्थितो वाऽस्थितो वा । न गन्धस्वभावः स्थितो वाऽस्थितो वा । न रसस्वभावः स्थितो वाऽस्थितो वा । न स्पर्शस्वभावः स्थितो वाऽस्थितो वा । न धर्मस्वभावः स्थितो वाऽस्थितो वा । तत्कस्य हेतोस्तथा हि रूपं रूपेण शून्यं । शब्दो शब्देन शून्यः । गन्धो गन्धेन शून्यः । रसो रसेन शून्यः । स्पर्शः स्पर्शेन शून्यः । धर्माः धर्मैः शून्याः ।

तद्यथापि नाम सुभूते चक्षुर्विज्ञानशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते श्रोत्रविज्ञानशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते घ्राणविज्ञानशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते जिह्वाविज्ञानशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते कायविज्ञानशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते मनो विज्ञानशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते चक्षुर्विज्ञानस्वभावः स्थितो वाऽस्थितो वा। न श्रोत्रविज्ञानस्वभाव स्थितो वाऽस्थितो वा। न घ्राणविज्ञानस्वभावः स्थितो वाऽस्थितो वा। न जिह्वाविज्ञानस्वभावः स्थितो वाऽस्थितो वा। न कायविज्ञानस्वभावः स्थितो वाऽस्थितो वा। मनोविज्ञानस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि चक्षुर्विज्ञानं चक्षुर्विज्ञानेन शून्यं। श्रोत्रविज्ञानं श्रोत्रविज्ञानेन शून्यं। घ्राणविज्ञानं घ्राणविज्ञानेन शून्यं। जिह्वाविज्ञानं जिह्वाविज्ञानेन शून्यं। कायविज्ञानं कायविज्ञानेन शून्यं। मनोविज्ञानं मनोविज्ञानेन शून्यम्।

तद्यथापि नाम सुभूते चक्षुःसंस्पर्शशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते श्रोत्रसंस्पर्शशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं म स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते घ्राणसंस्पर्शशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते जिह्वासंस्पर्शशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाऽस्थितं। तद्यथापि नाम सुभूते कायसंस्पर्शशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते मनःसंस्पर्शशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि चक्षुःसंस्पर्शस्वभावः स्थितो वाऽस्थितो वा। न श्रोत्रसंस्पर्शस्वभावः स्थितो वाऽस्थितो वा। न घ्राणसंस्पर्शस्वभावः स्थितो वाऽस्थितो वा। न जिह्वासंस्पर्शस्वभावः स्थितो वाऽस्थितो वा। न कायसंस्पर्शस्वभावः स्थितो वाऽस्थितो वा। न मनः संस्पर्शस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि सुभूते चक्षुःसंस्पर्शश्चक्षुःसंस्पर्शेन शून्यः। श्रोत्रसंस्पर्शः श्रोत्रसंस्पर्शेन शून्यः। घ्राणसंस्पर्शो घ्राणसंस्पर्शेन शून्यः। जिह्वासंस्पर्शो जिह्वासंस्पर्शेन शून्यः। कायसंस्पर्शः कायसंस्पर्शेन शून्यः। मनःसंस्पर्शो मनःसंस्पर्शेन शून्यः।

तद्यथापि नाम सुभूते चक्षुःसंस्पर्शप्रत्ययवेदितशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते श्रोत्रसंस्पर्शप्रत्ययवेदितशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते घ्राणसंस्पर्शप्रत्ययवेदितशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते जिह्वासंस्पर्शप्रत्ययवेदितशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते कायसंस्पर्शप्रत्ययवेदितशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्यथापि नाम सुभूते मनःसंस्पर्शप्रत्ययवेदितशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते चक्षुःसंस्पर्शप्रत्ययवेदितस्वभावः स्थितो वाऽस्थितो वा। न श्रोत्रसंस्पर्शप्रत्ययवेदितस्वभावः स्थितो वाऽस्थितो वा। न घ्राणसंस्पर्शप्रत्ययवेदितस्वभावः स्थितो वाऽस्थितो वा। न जिह्वासंस्पर्शप्रत्ययवेदितस्वभावः स्थितो वाऽस्थितो वा। न कायसंस्पर्शप्रत्ययवेदितस्वभावः स्थितो वाऽस्थितो वा। न मनःसंस्पर्शप्रत्ययवेदितस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि चक्षुःसंस्पर्शप्रत्ययवेदितं चक्षुःसंस्पर्शप्रत्ययवेदितेन शून्यं। श्रोत्रसंस्पर्शप्रत्ययवेदितं श्रोत्रसंस्पर्शप्रत्ययवेदितेन शून्यं। घ्राणसंस्पर्शप्रत्ययवेदितं घ्राणसंस्पर्शप्रत्ययवेदितेन शून्यं। जिह्वासंस्पर्शप्रत्ययवेदितं जिह्वासंस्पर्शप्रत्ययवेदितेन शून्यं। कायसंस्पर्शप्रत्ययवेदितं कायसंस्पर्शप्रत्ययवेदितेन शून्यं। मनःसंस्पर्शप्रत्ययवेदितं मनःसंस्पर्शप्रत्ययवेदितेन शून्यम्।

तद्यथापि नाम सुभूते स्वप्नो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते माया न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते मरीचिर्न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते प्रतिश्रुत्का न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते प्रतिभासो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्यथापि नाम सुभूते तथागतनिर्म्मितो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि स्वप्नस्वभावः स्थितो वाऽस्थितो वा। न मायास्वभावः स्थितो वाऽस्थितो वा। न मरीचिस्वभावः स्थितो वाऽस्थितो वा। न प्रतिश्रुत्कस्वभावः स्थितो वाऽस्थितो वा। न प्रतिभासस्वभावः स्थितो वाऽस्थितो वा। न तथागतनिर्म्मितस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि स्वप्नः स्वप्नेन शून्यः। माया मायया शून्या। मरीचिर्मरीच्या शून्या। प्रतिश्रुत्का प्रतिश्रुत्कया शून्या। प्रतिभासः प्रतिभासेन शून्यः। तथागतनिर्म्मितस्तथागतनिर्म्मितेन शून्यः।

तद्यथापि नाम सुभूते दानपारमिता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते शीलपारमिता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते क्षान्तिपारमिता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते वीर्य्यपारमिता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते ध्यानपारमिता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते प्रज्ञापारमिता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्यहेतोर्न हि सुभूते दानपारमितास्वभावः स्थितो वाऽस्थितो वा। न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शीलपारमितास्वभावः स्थितो वाऽस्थितो वा। न क्षान्तिपारमितास्वभावः स्थितो वाऽस्थितो वा। न वीर्य्यपारमितास्वभावः स्थितो वाऽस्थितो वा। न ध्यानपारमितास्वभावः स्थितो वाऽस्थितो वा। न प्रज्ञापारमितास्वभावः स्थितो वाऽस्थितो। तत्कस्य हेतोस्तथाहि दानपारमिता दानपारमितया शून्या। शीलपारमिता शीलपारमितया शून्या। क्षान्तिपारमिता क्षान्तिपारमितया शून्या। वीर्य्यपारमिता वीर्य्यपारमितया शून्या। ध्यानपारमिता ध्यानपारमितया शून्या। प्रज्ञापारमिता प्रज्ञापारमितया शून्या।

तद्यथापि नाम सुभूते अध्यात्मशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं। तद्यथापि नाम सुभूते बहिर्द्धाशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते अध्यात्मबहिर्द्धाशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते शून्यताशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते महाशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते परमार्थशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते संस्कृतशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूतेऽसंस्कृतशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते अत्यन्तशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूतेऽनवराग्रशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूतेऽनवकारशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते प्रकृतिशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते सर्व्वधर्मशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते स्वलक्षणशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूतेऽनुपलम्भशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूतेऽभावशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते स्वभावशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते अभावस्वभावशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितम्।

तत्कस्य हेतोर्न हि सुभूतेऽध्यात्मशून्यतास्वभावः स्थितो वाऽस्थितो वा। न बहिर्द्धाशून्यतास्वभावः स्थितो वाऽस्थितो वा। नाऽध्यात्मबहिर्द्धाशून्यतास्वभावः स्थितो वाऽस्थितो वा। न शून्यता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शून्यतास्वभावः स्थितो वाऽस्थितो वा। न महाशून्यतास्वभावः स्थितो वाऽस्थितो वा। न परमार्थशून्यतास्वभावः स्थितो वाऽस्थितो वा। न संस्कृतशून्यतास्वभावः स्थितो वाऽस्थितो वा। नाऽसंस्कृतशून्यतास्वभावः स्थितो वाऽस्थितो वा। नात्यन्तशून्यतास्वभावः स्थितो वाऽस्थितो वा। नाऽनवराग्रशून्यतास्वभावः स्थितो वाऽस्थितो वा। नाऽनवकारशून्यतास्वभावः स्थितो वाऽस्थितो वा। न प्रकृतिशून्यतास्वभावः स्थितो वाऽस्थितो वा। न सर्व्वधर्म्मशून्यतास्वभावः स्थितो वाऽस्थितो वा। न स्वलक्षणशून्यतास्वभावः स्थितो वाऽस्थितो वा। नाऽनुपलम्भशून्यतास्वभावः स्थितो वाऽस्थितो वा। नाऽभावशून्यतास्वभावः स्थितो वाऽस्थितो वा। न स्वभावशून्यतास्वभावः स्थितो वाऽस्थितो वा। नाऽभावस्वभावशून्यतास्वभावः स्थितो वाऽस्थितो वा।

तत्कस्य हेतोस्तथा ह्यध्यात्मशून्यताऽध्यात्मशून्यतया शून्या। बहिर्द्धाशून्यता बहिर्द्धाशून्यतया शून्या। अध्यात्मबहिर्द्धाशून्यताऽध्यात्मबहिर्द्धाशून्यतया शून्या। शून्यताशून्यता शून्यताशून्यतया शून्या। महाशून्यता महाशून्यतया शून्या। परमार्थशून्यता परमार्थशून्यतया शून्या। संस्कृतशून्यता संस्कृतशून्यतया शून्या। असंस्कृतशून्यता असंस्कृतशून्यतया शून्या। अत्यन्तशून्यता अत्यन्तशून्यतया शून्या। अनवराग्रशून्यता अनवराग्रशून्यतया शून्या। अनवकारशून्यताऽनवकारशून्यतया शून्या। प्रकृतिशून्यता प्रकृतिशून्यतया शून्या। सर्व्वधर्म्मशून्यता सर्व्वधर्म्मशून्यतया शून्या। स्वलक्षणशून्यता स्वलक्षणशून्यतया शून्या। अनुपलम्भशून्यताऽनुपलम्भ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शून्यतया शून्या । अभावशून्यता अभावशून्यतया शून्या । स्वभावशून्यता स्वभावशून्यतया शून्या । अभावस्वभावशून्यता अभावस्वभावशून्यतया शून्या ।

तद्यथापि नाम सुभूते स्मृत्युपस्थानानि न स्थितानि नाऽस्थितानि । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते सम्यक्प्रहाणानि न स्थितानि नाऽस्थितानि । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते ऋद्धिपादाः न स्थिता नाऽस्थिताः । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते इन्द्रियाणि न स्थितानि नाऽस्थितानि । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते बलानि न स्थितानि नाऽस्थितानि । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते बोध्यङ्गानि न स्थितानि नाऽस्थितानि । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते आर्य्याष्टाङ्गमार्गो न स्थितो नाऽस्थितः । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तत्कस्य हेतोर्न हि सुभूते स्मृत्युपस्थानस्वभावः स्थितो वाऽस्थितो वा । न सम्यक्प्रहाणस्वभावः स्थितो वाऽस्थितो वा । नार्द्धिपादस्वभावः स्थितो वाऽस्थितो वा । नेन्द्रियस्वभावः स्थितो वाऽस्थितो वा । न बलस्वभावः स्थितो वाऽस्थितो वा । न बोध्यङ्गस्वभावः स्थितो वाऽस्थितो वा । नार्य्याष्टाङ्गमार्गस्वभावः स्थितो वाऽस्थितो वा । तत्कस्य हेतोस्तथा हि स्मृत्युपस्थानानि स्मृत्युपस्थानैः शून्यानि । सम्यक्प्रहाणानि सम्यक्प्रहाणैः शून्यानि । ऋद्धिपादाः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऋद्धिपादैः शून्याः। इन्द्रियाणीन्द्रियैः शून्यानि। बलानि बलैः शून्यानि। बोध्यङ्गानि बोध्यङ्गैः शून्यानि। मार्गो मार्गेण शून्यः।

तद्यथापि नाम सुभूते आर्य्यसत्यानि न स्थितानि नाऽस्थितानि। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते ध्यानानि न स्थितानि नाऽस्थितानि। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते अप्रमाणानि न स्थितानि नाऽस्थितानि। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते आरूप्यसमापत्तयो न स्थिता नाऽस्थिताः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूतेऽष्टौ विमोचाः न स्थिता नाऽस्थिताः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते अनुपूर्व्वविहारसमापत्तयो न स्थिताः नाऽस्थिताः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते शून्यतानिमित्ताप्रणिहितविमोचसुखानि न स्थितानि नाऽस्थितानि। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते अभिज्ञा न स्थिता नाऽस्थिता। एवमेवसुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते समाधयो न स्थिता नाऽस्थिताः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते धरणीसुखानि न स्थितानि नाऽस्थितानि। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते आर्य्यसत्यस्वभावः स्थितो वाऽस्थितो वा। न ध्यानस्वभावः स्थितो वाऽस्थितो वा। नाऽप्र-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

माणस्वभावः स्थितो वाऽस्थितो वा । नारूप्यसमापत्तिस्वभावः स्थितो वाऽस्थितो वा । नाष्टविमोक्षस्वभावः स्थितो वाऽस्थितो वा । नाऽनुपूर्व्वविहारसमापत्तिस्वभावः स्थितो वाऽस्थितो वा । न शून्यतानिमित्ताप्रणिहितविमोक्षस्वभावः स्थितो वाऽस्थितो वा नाऽभिज्ञास्वभावः स्थितो वाऽस्थितो वा । न समाधिस्वभावः स्थितो वाऽस्थितो वा । न धारणीमुखस्वभावः स्थितो वाऽस्थितो वा । तत्कस्य हेतोस्तथा ह्यार्य्यसत्यान्यार्य्यसत्यैः शून्यानि । ध्यानानि ध्यानैः शून्यानि । अप्रमाणान्यप्रमाणैः शून्यानि । आरूप्यसमापत्तयः आरूप्यसमापत्तिभिः शून्याः । विमोक्षाः विमोक्षैः शून्याः । अनुपूर्व्वविहारसमापत्तयोऽनुपूर्व्वविहारसमापत्तिभिः शून्याः । शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखानि शून्यतानिमित्ताप्रणिहितविमोक्षमुखैः शून्यानि । अभिज्ञाः अभिज्ञाभिःशून्याः । समाधयः समाधिभिः शून्याः । धारणीमुखानि धारणीमुखैः शून्यानि ।

तद्यथापि नाम सुभूते दशतथागतबलानि न स्थितानि नाऽस्थितानि । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते चत्वारिवैशारद्यानि न स्थितानि नाऽस्थितानि । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते चतस्रः प्रतिसम्बिदो न स्थिताः नाऽस्थिताः । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते महाकरुणा न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते अष्टादशावेणिकबुद्धधर्म्मा न स्थिताः नाऽस्थिताः । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्कस्य हेतोर्न हि सुभूते दशतथागतबलस्वभावः स्थितो वाऽस्थितो वा। न वैशारद्यस्वभावः स्थितो वाऽस्थितो वा। न प्रतिसम्वित् स्वभावः स्थितो वाऽस्थितो वा। न महाकरुणास्वभावः स्थितो वाऽस्थितो वा। नावेणिकबुद्धधर्म्मस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि दशतथागतबलानिबलैः शून्यानि। चत्वारि वैशारद्यानि वैशारद्यैः शून्यानि। चतस्रः प्रतिसम्विदः प्रतिसम्वित् स्वभावैः शून्याः। महाकरुणामहाकरुणयाशून्या। अष्टादशावेणिक-बुद्धधर्म्माः आवेणिकबुद्धधर्म्मैः शून्याः।

तद्यथापि नाम सुभूतेऽर्हत् चीणाश्रया न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते प्रत्येकबुद्धो न स्थितो नास्थितः। एवमेव सुभूते तन्महा-यानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूतेऽर्हत् चीणा-श्रवस्वभावः स्थितो वाऽस्थितो वा। न प्रत्येकबुद्धस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि अर्हत् स्वभावोऽर्हत् स्वभावेन शून्यः। प्रत्येकबुद्धस्वभावः प्रत्येकबुद्धस्वभावेन शून्यः।

तद्यथापि नाम सुभूते बोधिसत्त्वो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते तथागतोऽर्हत् सम्यक्सम्बुद्धो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते बोधिसत्त्वस्वभावः स्थितो वाऽस्थितो वा। न तथागतस्वभावः स्थितो वाऽस्थितो। तत्कस्य हेतोस्तथा हि बोधिसत्त्व स्वभावो बोधिसत्त्व स्वभावेन शून्यः। तथागत स्वभावस्तथागत स्वभावेन शून्यः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्यथापि नाम सुभूते स्रोत आपत्तिफलं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते सकृदागामिफलं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते अनागामिफलं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूतेऽर्हत्वं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते प्रत्येक बोधिर्न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न सुभूते स्रोत आपत्तिफलस्वभावः स्थितो वाऽस्थितो वा। न सकृदागामिफलस्वभावः स्थितो वाऽस्थितो वा। नाऽनागामिफलस्वभावः स्थितो वाऽस्थितो वा। नार्हत्त्वस्वभावः स्थितो वाऽस्थितो वा। न प्रत्येकबोधिस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि स्रोत आपत्तिफलस्वभावः स्रोत आपत्तिफल-स्वभावेन शून्यः। सकृदागामिफलस्वभावः सकृदागामिफलस्वभावेन शून्यः। अनागामिफलस्वभावोऽनागामिफलस्वभावेन शून्यः। अर्हत्त्व-स्वभावोऽर्हत्त्वस्वभावेन शून्यः। प्रत्येकबोधिस्वभावः प्रत्येकबोधि-स्वभावेन शून्यः।

तद्यथापि नाम सुभूते मार्गाकारज्ञता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते सर्व्वाकारज्ञता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न सुभूते मार्गा-कारज्ञतास्वभावः स्थितो वाऽस्थितो वा। न सर्व्वाकारज्ञतास्वभावः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि मार्गाकारज्ञता-स्वभावो मार्गाकारज्ञतास्वभावेन शून्यः। सर्व्वाकारज्ञतास्वभावः सर्व्वाकारज्ञतास्वभावेन शून्यः।

तद्यथापि नाम सुभूते नाम स्वभावं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते निमित्तं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्याथापि नाम सुभूते सङ्केतो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थिनं नाऽस्थितं। तद्यथापि नाम सुभूते व्यवहारो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते प्रज्ञप्तिर्नस्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते नाम स्वभावः स्थितो वाऽस्थितो वा। न नाम निमित्तस्वभावः स्थितो वाऽस्थितो वा। न सङ्केतस्वभावः स्थितो वाऽस्थितो वा। न व्यवहारस्वभावः स्थितो वाऽस्थितो वा। न प्रज्ञप्तिस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि नाम स्वभावो नाम स्वभावेन शून्यः। निमित्तस्वभावो निमित्तस्वभावेन शून्यः। सङ्केतस्वभावः सङ्केत-स्वभावेन शून्यः। व्यवहारस्वभावो व्यवहारस्वभावेन शून्यः। प्रज्ञप्तिस्वभावः प्रज्ञप्तिस्वभावेन शून्यः।

तद्यथापि नाम सुभूतेऽनुत्पादो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते-ऽनिरोधो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न स्थितं नाऽस्थितं। तद्यथापि ना सुभूतेऽसंक्लेशो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूतेऽव्यवदानं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूतेऽनुत्पाद-स्वभावः स्थितो वाऽस्थितो वा। न निरोधस्वभावः स्थितो वाऽस्थितो वा। नाऽसंक्लेशस्वभावः स्थितो वाऽस्थितो वा। नाऽव्यवदानस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि अनुत्पादस्वभावोऽनुत्पादस्वभावेन शून्यः। अनिरोधस्वभावोऽनि-रोधस्वभावेन शून्यः। असंक्लेशस्वभावोऽसंक्लेशस्वभावेन शून्यः। अव्यवदानस्वभावोऽव्यवदानस्वभावेन शून्यः।

तद्यथापि नाम सुभूतेऽनभिसंस्कारो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूतेऽनभिसंस्कारस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि अनभिसंस्कारस्वभावोऽनभिसंस्कारस्वभावेन शून्यः। अनेन पर्य्यायेण तद्यानं न क्वचित् स्थास्यत्यस्थितस्थानयोगेन।

यत् पुनः सुभूतिरेवमाह कस्तेन यानेन निर्यास्यतीति। न कश्चित्तेन यानेन निर्यास्यतीति। न कश्चित्तेन यानेन निर्याति। तत्कस्य हेतोस्तथा हि सुभूते यच्च तद्यानं यश्च निर्यायाद्ये न च निर्यायाद्यतश्च निर्यायात्। सर्व्वत्र ते धर्म्मा न संविद्यन्ते नोपलभ्यन्ते। एवमसम्विद्यमानेष्वनुपलभ्यमानेषु सर्व्वधर्म्मेषु कतमो धर्म्मः कतमेन धर्म्मेण निर्यास्यति। तत्कस्य हेतोस्तथा हि सुभूतेऽत्यन्ततयात्मा-नोपलभ्यते। सत्त्वो नोपलभ्यते। जीवो नोपलभ्यते। जन्तुर्नोपलभ्यते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पोषो नोपलभ्यते। पुरुषो नोपलभ्यते। पुद्गलो नोपलभ्यते। मनुजो नोपलभ्यते। मानवो नोपलभ्यते। कारको नोपलभ्यते। वेदको नोपलभ्यते। जानको नोपलभ्यते। पश्यको नोपलभ्यते। अत्यन्तविशुद्धितामुपादाय। आत्मनोऽत्यन्तविशुद्धितामुपादाय। सत्त्वस्यात्यन्तविशुद्धितामुपादाय। जीवस्याऽत्यन्तविशुद्धितामुपादाय। जन्तोरत्यन्तविशुद्धितामुपादाय। पोषस्याऽत्यन्तविशुद्धितामुपादाय। पुरुषस्याऽत्यन्तविशुद्धितामुपादाय। पुद्गलस्याऽत्यन्तविशुद्धितामुपादाय। मनुजस्यात्यन्तविशुद्धितामुपादाय। मानवस्यात्यन्तविशुद्धितामुपादाय। कारकस्याऽत्यन्तविशुद्धितामुपादाय। वेदकस्याऽत्यन्तविशुद्धितामुपादाय। जानकस्याऽत्यन्तविशुद्धितामुपादाय। पश्यकस्याऽत्यन्तविशुद्धितामुपादाय। धर्म्मधातुर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। तथतानोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। भूतकोटिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अचिन्त्यधातुर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। स्कन्धानोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। धातवो नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। आयतनानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। प्रतीत्यसमुत्पादो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। दानपारमिता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। शीलपारमिता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। क्षान्तिपारमिता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। वीर्य्यपारमिता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। ध्यानपारमिता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। प्रज्ञापारमिता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अध्यात्मशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। वहिर्द्धा-शून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अध्यात्मवहिर्द्धा-शून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। शून्यताशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। महाशून्यतानोपलभ्यते-ऽत्यन्तविशुद्धितामुपादाय। परमार्थशून्यता नोपलभ्यतेऽत्यन्त-विशुद्धितामुपादाय। संस्कृतशून्यता नोपलभ्यतेऽत्यन्तविशुद्धिता-मुपादाय। असंस्कृतशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अत्यन्तशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनवराग्र-शून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनवकारशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। प्रकृतिशून्यता नोपलभ्यते-ऽत्यन्तविशुद्धितामुपादाय। सर्व्वधर्म्मशून्यता नोपलभ्यतेऽत्यन्त-विशुद्धितामुपादाय। स्वलक्षणशून्यता नोपलभ्यतेऽत्यन्तविशुद्धिता-मुपादाय। अनुपलम्भशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अभावशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। स्वभावशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अभावस्वभावशून्यता नोप-लभ्यतेऽत्यन्तविशुद्धितामुपादाय।

स्मृत्युपस्थानानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। सम्यक्-प्रहाणानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाया। ऋद्धिपादा नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। इन्द्रियाणि नोपलभ्यन्ते-ऽत्यन्तविशुद्धितामुपादाय। बलानि नोपलभ्यन्तेऽत्यन्तविशुद्धिता-मुपादाय। बोध्यङ्गानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। आर्य्याष्टाङ्गमार्गा नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। आर्य्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्यानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। ध्यानानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। अप्रमाणानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। आरूप्यसमापत्तयो नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। अष्टौ विमोक्षा नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। अनुपूर्व्वविहारसमापत्तयो नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। अभिज्ञा नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। समाधयो नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। धारणीमुखानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। तथागतबलानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। वैशारद्यानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। प्रतिसम्विदो नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। महाकरुणा नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। आवेणिकबुद्धधर्म्मा नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। स्रोत आपत्ती नोपलभ्यते अत्यन्तविशुद्धितामुपादाय। सकृदागामिनो नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। अनागामिनो नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। अर्हन्तो नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। प्रत्येकबुद्धा नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। बोधिसत्त्वा नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। तथागतोऽर्हन् सम्यक्सम्बुद्धो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। स्रोत आपत्तिफलं नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। सकृदागामिफलं नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनागामिफलं नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अर्हत्वं नोपलभ्यतेऽत्यन्तविशुद्धिता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुपादाय। प्रत्येकबोधिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। मार्गाकारज्ञता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। सर्व्वाकारज्ञता-नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनुत्पादो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनिरोधो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। असंक्लेशो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अव्यवदानं नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनभिसंस्कारो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। पूर्व्वान्तो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अपरान्तो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। प्रत्युत्पन्नं नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। आगामि नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। गतिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। स्थितिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। च्युतिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। उपपत्तिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। हानिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। वृद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। कस्याऽनुपलब्ध्याश्चैवं नोपलभ्यते।

धर्म्मधात्वनुपलब्ध्या नोपलभ्यते धर्म्मधातुस्तत्कस्य हेतोर्न हि सुभूते धर्म्मधात्वनुपलब्धिरुपलभ्यते नोपलभ्यते। तथताऽनुपलब्ध्या नोपलभ्यते। तत्कस्य हेतोर्न हि सुभूते तथताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। भूतकोट्यनुपलब्ध्या नोपलभ्यते भूतकोटिस्तत्कस्य हेतोर्न हि सुभूते भूतकोट्यनुपलब्धिरुपलभ्यते नोपलभ्यते। अचिन्त्यधात्वनुपलब्ध्या नोपलभ्यते। अचिन्त्यधातुस्तत्कस्य हेतोर्न हि सुभूतेऽचिन्त्यधात्वनुपलब्धिरुपलभ्यते न नोपलभ्यते। स्कन्धधात्वायतनानुपलब्ध्या नोपलभ्यते स्कन्धधात्वायतनानि। तत्कस्य हेतोर्न हि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुभूते स्कन्धधात्वायतनाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। प्रतत्य समुत्पादानुपलब्ध्या नोपलभ्यते प्रतीत्यसमुत्पादः। तत्कस्य हेतोर्न हि सुभूते प्रतीत्य समुत्पादाऽनुपलब्धिरुपलभ्यते न नोंपलभ्यते।

दानपारमिताऽनुपलब्ध्या नोपलभ्यते दानपारमिता। तत्कस्य हेतोर्न हि सुभूते दानपारमितानुपलब्धिरुपलभ्यते न नोपलभ्यते। शीलपारमिताऽनुपलब्ध्या नोपलभ्यते शीलपारमिता। तत्कस्य हेतोर्न हि सुभूते शीलपारमिताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। क्षान्तिपारमिताऽनुपलब्ध्या नोपलभ्यते क्षान्तिपारमिता। तत्कस्य हेतोर्न हि सुभूते क्षान्तिपारमिताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। वीर्य्यपारमिताऽनुपलब्ध्या नोपलभ्यते वीर्य्यपारमिता। तत्कस्य हेतोर्न हि सुभूते वीर्य्यपारमिताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। ध्यानपारमिताऽनुपलब्ध्या नोपलभ्यते ध्यानपारमिता। तत्कस्य हेतोर्न हि सुभूते ध्यानपारमिताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। प्रज्ञापारमिताऽनुपलब्ध्या नोपलभ्यते प्रज्ञापारमिता। तत्कस्य हेतोर्न हि सुभूते प्रज्ञापारमिताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते।

अध्यात्मशून्यताऽनुपलब्ध्या नोपलभ्यते अध्यात्मशून्यता। तत्कस्य हेतोर्न हि सुभूते अध्यात्मशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। बहिर्द्धाशून्यताऽनुपलब्ध्या नोपलभ्यते बहिर्द्धाशून्यता। तत्कस्य हेतोर्न हि सुभूते बहिर्द्धाशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अध्यात्मबहिर्द्धाशून्यताऽनुपलब्ध्या नोपलभ्यते अध्यात्मबहिर्द्धाशून्यता। तत्कस्य हेतोर्न हि सुभूते अध्यात्मबहिर्द्धाशून्यता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। शून्यताशून्यताऽनुपलब्ध्या नोपलभ्यते शून्यताशून्यता। तत्कस्य हेतोर्न हि सुभूते शून्यता-शून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। महाशून्यताऽनुपलब्ध्या नोपलभ्यते महाशून्यता। तत्कस्य हेतोर्न हि सुभूते महाशून्यता-ऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। परमार्थशून्यताऽनुपलब्ध्या नोपलभ्यते परमार्थशून्यता। तत्कस्य हेतोर्न हि सुभूते परमार्थ-शून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। संस्कृतशून्यताऽनुप-लब्ध्या नोपलभ्यते संस्कृतशून्यता। तत्कस्य हेतोर्न हि सुभूते संस्कृतशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। असंस्कृतशून्यता-ऽनुपलब्ध्या नोपलभ्यतेऽसंस्कृतशून्यता। तत्कस्य हेतोर्न हि सुभूते ऽसंस्कृतशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अत्यन्तशून्यता-ऽनुपलब्ध्या नोपलभ्यतेऽत्यन्तशून्यता। तत्कस्य हेतोर्न हि सुभूते ऽत्यन्तशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अनवराग्रशून्यता-ऽनुपलब्ध्या नोपलभ्यतेऽनवराग्रशून्यता। तत्कस्य हेतोर्न हि सुभूते अनवराग्रशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अनवकार-शून्यताऽनुपलब्ध्या नोपलभ्यतेऽनवकारशून्यता। तत्कस्य हेतोर्न हि सुभूतेऽनवकारशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। प्रकृति-शून्यताऽनुपलब्ध्या नोपलभ्यते प्रकृतिशून्यता। तत्कस्य हेतोर्न हि सुभूते प्रकृतिशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। सर्व्व-धर्म्मशून्यताऽनुपलब्ध्या नोपलभ्यते सर्व्वधर्म्मशून्यता। तत्कस्य हेतोर्न हि सुभूते सर्व्वधर्म्मशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। स्वलक्षणशून्यताऽनुपलब्ध्या नोपलभ्यते स्वलक्षणशून्यता। तत्कस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेतोर्न हि सुभूते स्वलक्षणशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अनुपलम्भशून्यताऽनुपलब्ध्या नोपलभ्यतेऽनुपलम्भशून्यता। तत्कस्य हेतोर्न हि सुभूतेऽनुपलम्भशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अभावशून्यताऽनुपलब्ध्या नोपलभ्यते अभावशून्यता। तत्कस्य हेतोर्न हि सुभूतेऽभावशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। स्वभावशून्यताऽनुपलब्ध्या नोपलभ्यते स्वभावशून्यता। तत्कस्य हेतोर्न हि सुभूते स्वभावशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अभावस्वभावशून्यताऽनुपलब्ध्या नोपलभ्यतेऽभावस्वभावशून्यता। तत्कस्य हेतोर्न हि सुभूते अभावस्वभावशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते।

स्मृत्युपस्थानाऽनुपलब्ध्या नोपलभ्यन्ते स्मृत्युपस्थानानि। तत्कस्य हेतोर्न हि सुभूते स्मृत्युपस्थानाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। सम्यक्प्रहाणाऽनुपलब्ध्या नोपलभ्यन्ते सम्यक्प्रहाणानि। तत्कस्य हेतोर्न हि सुभूते सम्यक्प्रहाणाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। ऋद्धिपादऽनुपलब्ध्या नोपलभ्यन्ते ऋद्धिपादाः। तत्कस्य हेतोर्न हि सुभूते ऋद्धिपादाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। इन्द्रियाऽनुपलब्ध्या नोपलभ्यन्ते इन्द्रियाणि। तत्कस्य हेतोर्न हि सुभूते इन्द्रियाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। बलाऽनुपलब्ध्या नोपलभ्यन्ते बलानि। तत्कस्य हेतोर्न हि सुभूते बलाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। बोध्यङ्गानुपलब्ध्या नोपलभ्यन्ते बोध्यङ्गानि। तत्कस्य हेतोर्न हि सुभूते बोध्यङ्गानुपलब्धिरुपलभ्यते न नोपलभ्यते। मार्गाऽनुपलब्ध्या नोपलभ्यते मार्गः। तत्कस्य हेतोर्न हि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुभूते मार्गाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते । आर्य्यसत्याऽनुपलब्ध्या नोपलभ्यन्ते आर्य्यसत्यानि । तत्कस्य हेतोर्न हि सुभूते आर्य्यसत्याऽनुपलब्धिरुपलभ्यते न नोपलभ्यते । ध्यानाऽनुपलब्ध्या नोपलभ्यन्ते ध्यानानि । तत्कस्य हेतोर्न हि सुभूते ध्यानाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते । अप्रमाणाऽनुपलब्ध्या नोपलभ्यन्तेऽप्रमाणानि । तत्कस्य हेतोर्न हि सुभूतेऽप्रमाणाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते । आरूप्यसमापत्त्यनुपलब्ध्या नोपलभ्यन्ते आरूप्यसमापत्तयः । तत्कस्य हेतोर्न हि सुभूते आरूप्यसमापत्त्यनुपलब्धिरुपलभ्यते न नोपलभ्यते । विमोक्षाऽनुपलब्ध्या नोपलभ्यन्ते विमोक्षाः । तत्कस्य हेतोर्न हि सुभूते विमोक्षाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते । अनुपूर्व्वविहारसमापत्त्यनुपलब्ध्या नोपलभ्यन्तेऽनुपूर्व्वविहारसमापत्तयः । तत्कस्य हेतोर्न हि सुभूते अनुपूर्व्वविहारसमापत्त्यनुपलब्धिरुपलभ्यते न नोपलभ्यते । शून्यतानिमित्ताप्रणिहितविमोक्षमुखाऽनुपलब्ध्या नोपलभ्यन्ते शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि । तत्कस्य हेतोर्न हि सुभूते शून्यतानिमित्ताप्रणिहितविमोक्षमुखाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते । अभिज्ञाऽनुपलब्ध्या नोपलभ्यतेऽभिज्ञा । तत्कस्य हेतोर्न हि सुभूतेऽभिज्ञाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते । समाध्यनुपलब्ध्या नोपलभ्यन्ते समाधयः । तत्कस्य हेतोर्न हि सुभूते समाध्यनुपलब्धिरुपलभ्यते न नोपलभ्यते । धारणीमुखानुपलब्ध्या नोपलभ्यन्ते धारणीमुखानि । तत्कस्य हेतोर्न हि सुभूते धारणीमुखाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते । तथागतबलानुपलब्ध्या नोपलभ्यन्ते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथागतबलानि। तत्कस्य हेतोर्न ।ह सुभूते तथागतबलानुपलब्धिरुपलभ्यते न नोपलभ्यते। वैशारद्याऽनुपलब्ध्या नोपलभ्यन्ते वैशारद्यानि। तत्कस्य हेतोर्न हि सुभूते वैशारद्याऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। प्रतिसम्विदनुपलब्ध्या नोपलभ्यन्ते प्रतिसम्विदः। तत्कस्य हेतोर्न हि सुभूते प्रतिसम्विदनुपलब्धिरुपलभ्यते न नोपलभ्यते। महाकरुणाऽनुपलब्ध्या नोपलभ्यते महाकरुणा। तत्कस्य हेतोर्न हि सुभूते महाकरुणाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अष्टादशवेणिकबुद्धधर्म्माऽनुपलब्ध्या नोपलभ्यन्ते अष्टादशवेणिकबुद्धधर्म्माः। तत्कस्य हेतोर्न हि सुभूते अष्टादशवेणिकबुद्धधर्म्माऽनुपलब्धिरुपलभ्यते न नोपलभ्यते।

स्रोत आपन्नाऽनुपलब्ध्या नोपलभ्यते स्रोत आपन्नः। तत्कस्य हेतोर्न हि सुभूते स्रोत आपन्नाऽनुलब्धिरुपलभ्यते न नोपलभ्यते। सकृदागाम्यनुपलब्ध्या नोपलभ्यते सकृदागामि। तत्कस्य हेतोर्न हि सुभूते सकृदागाम्यनुपलब्धिरुपलभ्यते न नोपलभ्यते। अनागाम्यनुपलब्ध्या नोपलभ्यतेऽनागामि। तत्कस्य हेतोर्न हि सुभूते अनागाम्यनुपलब्धिरुपलभ्यते न नोपलभ्यते। अर्हत्त्वाऽनुपलब्ध्या नोपलभ्यतेऽर्हन्। तत्कस्य हेतोर्न हि सुभूतेऽर्हत्वाऽनुलब्धिरुप लभ्यते न नोपलभ्यते। प्रत्येकबुद्धाऽनुपलब्ध्या नोपलभ्यते प्रत्येकबुद्धः। तत्कस्य हेतोर्न हि सुभूते प्रत्येकबुद्धाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। बोधिसत्त्वाऽनुपलब्ध्या नोपलभ्यते बोधिसत्त्वः। तत्कस्य हेतोर्न हि सुभूते बोधिसत्त्वाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। तथागताऽनुपलब्ध्या नोपलभ्यते तथागतः। तत्कस्य हेतोर्न हि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुभूते तथागताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। स्रोत आपत्ति-फलानुपलब्ध्या नोपलभ्यते स्रोत आपत्तिफलं। तत्कस्य हेतोर्न हि सुभूते स्रोत आपत्तिफलानुपलब्धिरुपलभ्यते न नोपलभ्यते। सकृदागामिफलाऽनुपलब्ध्या नोपलभ्यते सकृदागामिफलं। तत्कस्य हेतोर्न हि सुभूते सकृदागामिफलाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अनागामिफलाऽनूपलब्ध्या नोपलभ्यतेऽनागामिफलं। तत्कस्य हेतोर्न हि सुभूते अनागामिफलाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अर्हत्त्वाऽनुपलब्ध्या नोपलभ्यते अर्हत्त्वं। तत्कस्य हेतोर्न हि सुभूते अर्हत्वाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। प्रत्येक-बोध्यनुपलब्ध्या नोपलभ्यते प्रत्येकबोधिः। तत्कस्य हेतोर्न हि सुभूते प्रत्येकबोध्यनुपलब्धिरुपलभ्यते न नोपलभ्यते। मार्गाकार-ज्ञताऽनुपलब्ध्या नोपलभ्यते मार्गाकारज्ञता। तत्कस्य हेतोर्न हि सुभूते मार्गाकारज्ञताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। सर्व्वा-कारज्ञताऽनुपलब्ध्या नोपलभ्यते सर्व्वाकारज्ञता। तत्कस्य हेतोर्न हि सुभूते सर्व्वाकारज्ञताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अनुत्पादाऽनुपलब्ध्या नोपलभ्यतेऽनुत्पादः। तत्कस्य हेतोर्न हि सुभूते अनुत्पादाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अनिरोधा-ऽनुपलब्ध्या नोपलभ्यतेऽनिरोधः। तत्कस्य हेतोर्न हि सुभूते अनिरोधाऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। असंक्लेशाऽनुपलब्ध्या नोपलभ्यते असंक्लेशः। तत्कस्य हेतोर्न हि सुभूते असंक्लेशा-ऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अव्यवदानाऽनुपलब्ध्या नोप-लभ्यतेऽव्यवदानं। तत्कस्य हेतोर्न हि सुभूते अव्यवदानाऽनुपलब्धि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रुपलभ्यते न नोपलभ्यते। अनभिसंस्काराऽनुपलब्ध्या नोपलभ्यते-ऽनभिसंस्कारः। तत्कस्य हेतोर्न सुभूते ऽनभिसंस्कारानुपलब्धिरुपलभ्यते न नोपलभ्यते। पूर्व्वान्ताऽनुपलब्ध्या नोपलभ्यते पूर्व्वान्तः। तत्कस्य हेतोर्न हि सुभूते पूर्व्वान्ताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अपरान्ताऽनुपलब्ध्या नोपलभ्यते ऽपरान्तः। तत्कस्य हेतोर्न हि सुभूते अपरान्तानुपलब्धिरुपलभ्यते न नोपलभ्यते। प्रत्युत्पन्नाऽनुपलब्ध्या नोपलभ्यते प्रत्युत्पन्नः। तत्कस्य हेतोर्न हि सुभूते प्रत्युत्पन्नानुपलब्धिरुपलभ्यते न नोपलभ्यते। आगत्यनुपलब्ध्या नोपलभ्यते आगतिः। तत्कस्य हेतोर्न हि सुभूते आगत्यनुपलब्धिरुपलभ्यते न नोपलभ्यते। गत्यनुपलब्ध्या नोपलभ्यते गतिः। तत्कस्य हेतोर्न हि सुभूते गत्यनुपलब्धिरुपलभ्यते न नोपलभ्यते। स्थित्यनुपलब्ध्या नोपलभ्यते स्थितिः। तत्कस्य हेतोर्न हि सुभूते स्थित्यनुपलब्धिरुपलभ्यते न नोपलभ्यते। च्युत्यनुपलब्ध्या नोपलभ्यते च्युतिः। तत्कस्य हेतोर्न हि सुभूते च्युत्यनुपलब्धिरुपलभ्यते न नोपलभ्यते। उपपत्त्यनुपलब्ध्या नोपलभ्यते उपपत्तिः। तत्कस्य हेतोर्न हि सुभूते उपपत्त्यनुपलब्धिरुपलभ्यते न नोपलभ्यते। हान्यनुपलब्ध्या नोपलभ्यते हानिः। तत्कस्य हेतोर्न हि सुभूते हान्यनुपलब्धिरुपलभ्यते न नोपलभ्यते। वृद्ध्यनुपलब्ध्या नोपलभ्यते वृद्धिः। तत्कस्य हेतोर्न हि सुभूते वृद्ध्यनुपलब्धिरुपलभ्यते न नोपलभ्यते।

प्रथमाभूमिर्भूम्यनुपलब्ध्या नोपलभ्यते। तत्कस्य हेतोर्न हि सुभूते प्रथमभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यते। द्वितीया-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भूमिर्भूम्यनुपलब्ध्या नोपलभ्यते । तत्कस्य हेतोर्न हि सुभूते द्वितीयभूम्यनुपलब्धिरुपलभ्यते । तृतीयाभूमिर्भूम्यनुपलब्ध्या नोपलभ्यते । तत्कस्य हेतोर्न हि सुभूते तृतीयभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यते । चतुर्थीभूमिर्भूम्यनुपलब्ध्या नोपलभ्यते । तत्कस्य हेतोर्न हि सुभूते चतुर्थभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यते । पञ्चमीभूमिर्भूम्यनुपलब्ध्या नोपलभ्यते । तत्कस्य हेतोर्न हि सुभूते पञ्चमभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यते । षष्ठीभूमिर्भूम्यनुपलब्ध्या नोपलभ्यते । तत्कस्य हेतोर्न हि सुभूते षष्ठभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यते । सप्तमीभूमिर्भूम्यनुपलब्ध्या नोपलभ्यते । तत्कस्य हेतोर्न हि सुभूते सप्तमभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यते । अष्टमीभूमिर्भूम्यनुपलब्ध्या नोपलभ्यते । तत्कस्य हेतोर्न हि सुभूते अष्टमभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यते । नवमीभूमिर्भूम्यनुपलब्ध्या नोपलभ्यते । तत्कस्य हेतोर्न हि सुभूते नवमभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यते । दशमीभूमिर्भूम्यनुपलब्ध्या नोपलभ्यते । तत्कस्य हेतोर्न हि सुभूते दशमभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यते ।

कतमा प्रथमाभूमिः कतमा द्वितीयाभूमिः कतमा तृतीयाभूमिः कतमा चतुर्थीभूमिः कतमा पञ्चमीभूमिः कतमा षष्ठीभूमिः कतमा सप्तमी भूमिः कतमा अष्टमीभूमिः कतमा नवमीभूमिः कतमा दशमीभूमिः । यदुतशुक्लविदर्शनाभूमिर्गोत्रभूमिरष्टमकभूमिनिर्दर्शनभूमिः स्तनभूमिर्वीतरागभूमिः कृताविभूमिः प्रत्येकबुद्धभूमिर्बोधिसत्त्वभूमिर्बुद्धभूमिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अध्यात्मशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । बहिर्द्धाशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । अध्यात्मबहिर्द्धाशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । शून्यताशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । महाशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । परमार्थशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । संस्कृतशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । असंस्कृतशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । अत्यन्तशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । अनवराग्रशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । अनवकारशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । प्रकृतिशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । सर्व्वधर्म्मशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । स्वलक्षणशून्यतायाः प्रथमाभूमिर्नोलभ्यते । अनुपलम्भशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । अभावशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । स्वभावशून्यतायाः प्रथमाभूमिर्नोपलभ्यते । अभावस्वभावशून्यतायाः प्रथमाभूमिर्नोपलभ्यते ।

अध्यात्मशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । बहिर्द्धाशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । अध्यात्मबहिर्द्धाशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । शून्यताशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । महाशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । परमार्थशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । संस्कृतशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । असंस्कृतशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । अत्यन्तशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । अनवराग्रशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । अनवकारशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । प्रकृतिशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । सर्व्वधर्म्मशून्यतायाद्वितीयाभूमिर्नोपलभ्यते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वलक्षणशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । अनुपलम्भशून्यताया-द्वितीयाभूमिर्नोपलभ्यते। अभावशून्यतायाद्वितीयाभूमिर्नोपलभ्यते। स्वभावशून्यतायाद्वितीयाभूमिर्नोपलभ्यते । अभावस्वभावशून्यताया-द्वितीयाभूमिर्नोपलभ्यते ।

अध्यात्मशून्यतायास्तृतीयाभूमिर्नोपलभ्यते । बहिर्द्धाशून्यताया-स्तृतीयाभूमिर्नोपलभ्यते । अध्यात्मबहिर्द्धाशून्यतायास्तृतीयाभूमि-र्नोपलभ्यते । शून्यताशून्यतायास्तृतीयाभूमिर्नोपलभ्यते । महा-शून्यतायास्तृतीयाभूमिर्नोपलभ्यते । परमार्थशून्यतायास्तृतीयाभूमि-र्नोपलभ्यते । संस्कृतशून्यतायास्तृतीयाभूमिर्नोपलभ्यते । असंस्कृत-शून्यतायास्तृतीयाभूमिर्नोपलभ्यते । अत्यन्तशून्यतायास्तृतीयाभूमि-र्नोपलभ्यते । अनवराग्रशून्यतायास्तृतीयाभूमिर्नोपलभ्यते । अनव-कारशून्यतायास्तृतीयाभूमिर्नोपलभ्यते । प्रकृतिशून्यतायास्तृतीया-भूमिर्नोपलभ्यते । सर्व्वधर्म्मशून्यतायास्तृतीयाभूमिर्नोपलभ्यते । स्वलक्षणशून्यतायास्तृतीयाभूमिर्नोपलभ्यते । अनुपलम्भशून्यताया-स्तृतीयाभूमिर्नोपलभ्यते । अभावशून्यतायास्तृतीयाभूमिर्नोपलभ्यते । स्वभावशून्यतायास्तृतीयाभूमिर्नोपलभ्यते । अभावस्वभावशून्यताया-स्तृतीयाभूमिर्नोपलभ्यते ।

अध्यात्मशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते । बहिर्द्धाशून्यताया-श्चतुर्थीभूमिर्नोपलभ्यते । अध्यात्मबहिर्द्धाशून्यताश्चतुर्थीभूमिर्नोप-लभ्यते । शून्यताशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते । महाशून्यताया-श्चतुर्थीभूमिर्नोपलभ्यते । परमार्थशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते। संस्कृतशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते । असंस्कृतशून्यतायाश्चतुर्थी-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भूमिर्नोपलभ्यते। अत्यन्तशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते। अनवराग्रशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते। अनवकारशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते। प्रकृतिशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते। सर्व्वधर्म्मशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते। स्वलक्षणशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते। अनुपलम्भशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते। अभावशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते। स्वभावशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते। अभावस्वभावशून्यतायाश्चतुर्थीभूमिर्नोपलभ्यते।

अध्यात्मशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। बहिर्द्धाशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। अध्यात्मबहिर्द्धाशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। शून्यताशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। महाशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। परमार्थशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। संस्कृतशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। असंस्कृतशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। अत्यन्तशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। अनवराग्रशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। अनवकारशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। प्रकृतिशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। सर्व्वधर्म्मशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। स्वलक्षणशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। अनुपलम्भशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। अभावशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। स्वभावशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते। अभावस्वभावशून्यतायाः पञ्चमीभूमिर्नोपलभ्यते।

अध्यात्मशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। बहिर्द्धाशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। अध्यात्मबहिर्द्धाशून्यतायाः षष्ठीभूमिर्नोप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लभ्यते। शून्यताशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। महाशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। परमार्थशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। संस्कृतशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। असंस्कृतशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। अत्यन्तशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। अनवराग्रशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। अनवकारशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। प्रकृतिशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। सर्व्वधर्म्मशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। स्वलक्षणशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। अनुपलम्भशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। अभावशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। स्वभावशून्यतायाः षष्ठीभूमिर्नोपलभ्यते। अभावस्वभावशून्यतायाः षष्ठीभूमिर्नोपलभ्यते।

अध्यात्मशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। बहिर्द्धाशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। अध्यात्मबहिर्द्धाशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। शून्यताशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। महाशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। परमार्थशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। संस्कृतशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। असंस्कृतशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। अत्यन्तशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। अनवराग्रशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। अनवकारशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। प्रकृतिशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। सर्व्वधर्म्मशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। स्वलक्षणशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। अनुपलम्भशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। अभावशून्यतायाः सप्तमीभूमिर्नोपलभ्यते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वभावशून्यतायाः सप्तमीभूमिर्नोपलभ्यते। अभावस्वभावशून्यतायाः सप्तमीभूमिर्नोपलभ्यते।

अध्यात्मशून्यताया अष्टमीभूमीर्नोपलभ्यते। बहिर्द्धाशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। अध्यात्मबहिर्द्धाशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। शून्यताशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। महाशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। परमार्थशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। संस्कृतशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। असंस्कृतशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। अत्यन्तशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। अनवराग्रशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। अनवकारशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। प्रकृतिशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। सर्व्वधर्म्मशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। स्वलक्षणशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। अनुपलम्भशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। अभावशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। स्वभावशून्यतायाः अष्टमीभूमिर्नोपलभ्यते। अभावस्वभावशून्यतायाः अष्टमीभूमिर्नोपलभ्यते।

अध्यात्मशून्यताया नवमीभूमिर्नोपलभ्यते। बहिर्द्धाशून्यताया नवमीभूमिर्नोपलभ्यते। अध्यात्मबहिर्द्धाशून्यताया नवमीभूमिर्नोपलभ्यते। शून्यताशून्यताया नवमीभूमिर्नोपलभ्यते। महाशून्यताया नवमीभूमिर्नोपलभ्यते। परमार्थशून्यताया नवमीभूमिर्नोपलभ्यते। संस्कृतशून्यताया नवमीभूमिर्नोपलभ्यते। असंस्कृतशून्यताया नवमीभूमिर्नोपलभ्यते। अत्यन्तशून्यताया नवमीभूमिर्नोपलभ्यते। अनवराग्रशून्यताया नवमीभूमिर्नोपलभ्यते। अनवकारशून्यताया

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नवमीभूमिर्नोपलभ्यते। प्रकृतिशून्यताया नवमीभूमिर्नोपलभ्यते। सर्व्वधर्म्मशून्यताया नवमीभूमिर्नोपलभ्यते। स्वलक्षणशून्यताया नवमीभूमिर्नोपलभ्यते। अनुपलम्भशून्यताया नवमीभूमिर्नोपलभ्यते। अभावशून्यताया नवमीभूमिर्नोपलभ्यते। स्वभावशून्यताया नवमीभूमिर्नोपलभ्यते। अभावस्वभावशून्यताया नवमीभूमिर्नोपलभ्यते।

अध्यात्मशून्यताया दशमीभूमिर्नोपलभ्यते। बहिर्द्धाशून्यताया दशमीभूमिर्नोपलभ्यते। अध्यात्मबहिर्द्धाशून्यताया दशमीभूमिर्नोपलभ्यते। शून्यताशून्यताया दशमीभूमिर्नोपलभ्यते। महाशून्यताया दशमीभूमिर्नोपलभ्यते। परमार्थशून्यताया दशमीभूमिर्नोपलभ्यते। संस्कृतशून्यताया दशमीभूमिर्नोपलभ्यते। असंस्कृतशून्यताया दशमीभूमिर्नोपलभ्यते। अत्यन्तशून्यताया दशमीभूमिर्नोपलभ्यते। अनवराग्रशून्यताया दशमीभूमिर्नोपलभ्यते। अनवकारशून्यताया दशमीभूमिर्नोपलभ्यते। प्रकृतिशून्यताया दशमीभूमिर्नोपलभ्यते। सर्व्वधर्म्मशून्यताया दशमीभूमिर्नोपलभ्यते। स्वलक्षणशून्यताया दशमीभूमिर्नोपलभ्यते। अनुपलम्भशून्यताया दशमीभूमिर्नोपलभ्यते। अभावशून्यताया दशमीभूमिर्नोपलभ्यते। स्वभावशून्यताया दशमीभूमिर्नोपलभ्यते। अभावस्वभावशून्यताया दशमीभूमिर्नोपलभ्यते।

तत्कस्य हेतोर्न हि सुभूते प्रथमाभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। न द्वितीयाभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। न तृतीयाभूम्यनुप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लब्धिरुपलभ्यते न नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। न चतुर्थीभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। न पञ्चमीभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। न षष्ठीभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। न सप्तमीभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। नाष्टमीभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। न नवमीभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। न दशमीभूम्यनुपलब्धिरुपलभ्यते न नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय।

अध्यात्मशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। बहिर्द्धाशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अध्यात्मबहिर्द्धाशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। शून्यताशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। महाशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। परमार्थशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। संस्कृतशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। असंस्कृतशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अत्यन्तशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनवराग्रशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनवकारशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। प्रकृतिशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धिता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुपादाय । सर्व्वधर्म्मशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशु-द्धितामुपादाय। स्वलक्षणशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्त-विशुद्धितामुपादाय। अनुपलम्भशून्यतया सत्त्वपरिपाको नोपलभ्यते-ऽत्यन्तविशुद्धितामुपादाय । अभावशून्यतया सत्त्वपरिपाको नोप-लभ्यतेऽत्यन्तविशुद्धितामुपादाय । स्वभावशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय । अभावस्वभावशून्यतया सत्त्वपरिपाको नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय ।

अध्यात्मशून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धिता-मुपादाय । बहिर्द्धाशून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्त-विशुद्धितामुपादाय । अध्यात्मबहिर्द्धाशून्यतया बुद्धक्षेत्रपरिशुद्धि-र्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय । शून्यताशून्यतया बुद्धक्षेत्र-परिशुद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय । महाशून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय । परमार्थ-शून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय । संस्कृतशून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपा-दाय । असंस्कृतशून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्तविशु-द्धितामुपादाय । अत्यन्तशून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यते-ऽत्यन्तविशुद्धितामुपादाय । अनवराग्रशून्यतया बुद्धक्षेत्रपरिशुद्धि-र्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय । अनवकारशून्यतया बुद्ध-क्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय । प्रकृतिशून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय । सर्व्वधर्म्म-शून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वलक्षणशून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनुपलम्भशून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अभावशून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। स्वभावशून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अभावस्वभावशून्यतया बुद्धक्षेत्रपरिशुद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय।

अध्यात्मशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। बहिर्द्धाशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। अध्यात्मबहिर्द्धाशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। शून्यताशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। महाशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। परमार्थशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। संस्कृतशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। असंस्कृतशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। अत्यन्तशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। अनवराग्रशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। अनवकारशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। प्रकृतिशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। सर्व्वधर्म्मशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। स्वलक्षणशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। अनुपलम्भशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। अभावशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। स्वभावशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। अभावस्वभावशून्यतया पञ्चचक्षूंषिनोपलभ्यन्ते। अत्यन्तविशुद्धितामुपादाय।

एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्ननुपलम्भयोगेन सर्व्वधर्म्माणां महायानेन सर्व्वाकारज्ञतायां स्थास्यति ॥ ० ॥

शतसाहस्राः प्रज्ञापारमिताया दशमः परिवर्त्तः ॥ ० ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ एकादशः परिवर्त्तः ॥

अथायुष्मान् सुभूतिर्भगवन्तमेतदवोचत् । महायानं महायानमिति भगवन्नुच्यते सदेवासुरमानुषं लोकमभिभूयनिर्यास्यति ते नोच्यते महायानमिति । आकाशसमं भगवंस्तन्महायानं । यथाकाशे अप्रमेयानामसंख्येयानां सत्त्वानामवकाशः । एवमेव भगवन्नस्मिन् महायाने अप्रमेयानामसंख्येयानां सत्त्वानामवकाशः । अनेन भगवन् पर्य्यायेण महायानमिदं बोधिसत्त्वानां महासत्त्वानां । न चाऽस्य महायानस्याङ्गमो वा निर्गमो वा स्थानं वा दृश्यते । नापि पूर्व्वान्तो नाऽपरान्तो न मध्यः । तद्यथापि नाम भगवन्नाकाशस्य नैवागमो वा दृश्यते न निर्गमो वा दृश्यते । न स्थानं दृश्यते । एवमेव भगवन्नस्य महायानस्य नैवागम उपलभ्यते न निर्गम उपलभ्यते नास्थानमुपलभ्यते । तद्यथापि नाम भगवन्नाकाशस्य नैव पूर्व्वान्त उपलभ्यते नाऽपरान्त उपलभ्यते न मध्य उपलभ्यते । त्र्यध्वसमतामुपादाय । एवमेव भगवन्नस्य महायानस्य नैव पूर्व्वान्त उपलभ्यते नापरान्त उपलभ्यते न मध्य उपलभ्यते । त्र्यध्वसमताया न मिदं भगवन् यदुतमहायानं । तस्मान्महायानं महायानमित्युच्यते ।

भगवानाह । एवमेतत् सुभूते एवमेतन्महायानमिदं बोधिसत्त्वस्य महासत्त्वस्य षट्पारमिताः । दानपारमिता शीलपारमिता क्षान्तिपारमिता वीर्य्यपारमिता ध्यानपारमिता प्रज्ञापारमिता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इदमुच्यते बोधिसत्त्वस्य महासत्त्वस्य महायानं। पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं यदुत सर्व्वधारणीमुखानि सर्व्वसमाधिमुखानि। शूरङ्गम समाधिः। रत्नमुद्रा समाधिः। सिंहविक्रीडित समाधिः। सुचन्द्र समाधिः। चन्द्रध्वजकेतु समाधिः। सर्व्वधर्म्मोद्गम समाधिः। विलोकितमूर्द्ध समाधिः। धर्म्मधातुनियतः समाधिः। नियतध्वजकेतुः समाधिः। वज्रः समाधिः। सर्व्वधर्म्म-प्रवेशमुद्रा समाधिः। समाधिराजसुप्रतिष्ठितः समाधिः। रश्मिप्रमुक्तः समाधिः। बलव्यूहः समाधिः। समुद्गतः समाधिः। निरुक्तिनियत-प्रवेशः समाधिः। अधिवचनसंप्रवेशः समाधिः। दिग्विलोकितः समाधिः। साधारणमुद्रा समाधि। असम्प्रमोषः समाधिः। सर्व्वधर्म्मसमवसरणसागरमुद्रा समाधिः। आकाशस्फुरणः समाधिः। वज्रमण्डलः समाधिः। ध्वजाग्रकेयूरः समाधिः। इन्द्रकेतुः समाधिः। स्रोतोऽनुगतः समाधिः। सिंहविजृम्भितः समाधिः। व्यभ्यस्तः समाधिः। रणजहः समाधिः। वैरोचनः समाधिः। अशेषः समाधिः। अनिकेतस्थितः समाधिः। निश्चित्तः समाधिः। विमलप्रदीपः समाधिः। अनन्तप्रभः समाधिः। प्रभाकरः समाधिः। समन्ताव-भासः समाधिः। शुद्धसारः समाधिः। विमलप्रभः समाधिः। रतिकरः समाधिः। विद्युत्प्रदीपः समाधिः। अक्षयः समाधिः। अजेयः समाधिः। तेजोवती समाधिः। क्षयापगतः समाधिः। अनिञ्जः समाधिः। अवितर्कः समाधिः। सूर्य्यप्रदीपः समाधिः। चन्द्रविमलः समाधिः। प्रज्ञाप्रदीपः समाधिः। शुद्धप्रतिभासः समाधिः। आलोककरः समाधिः। काराकारः समाधिः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्ञानकेतुः समाधिः। वज्रोपमः समाधिः। चित्तस्थितिः समाधिः। समन्तालोकः समाधिः। सुप्रतिष्ठितः समाधिः। रत्नकोटिः समाधिः। वरधर्म्ममुद्रा समाधिः। सर्व्वधर्म्मसमता समाधिः। रतिजहः समाधिः। धर्म्मोद्गतः समाधिः। अविकिरणः समाधिः। सर्व्वधर्म्मपदप्रभेदः समाधिः। समाक्षरावकारः समाधिः। अक्षरापगतः समाधिः। आरम्बणच्छेदनः समाधिः। अविकारः समाधिः। अप्रकारः समाधिः। नामनियतप्रवेशः समाधिः। अनिकेतचारी समाधिः। तिमिरापगतः समाधिः। चारित्रवती समाधिः। अचलः समाधिः। विषयतीर्णः समाधिः। सर्व्वगुणसञ्चयगतः समाधिः। स्थितनिश्चित्तः समाधिः। शुभपुष्पितशुद्धिः समाधिः। अनन्तप्रतिभानः समाधिः। असमसमः समाधिः। सर्व्वधर्म्मातिक्रमणः समाधिः। परिच्छेदकरः समाधिः। विमतिविकिरणः समाधिः। निरधिष्ठानः समाधिः। एकव्यूहः समाधिः। आकाशाभिनिर्हारः समाधिः। एकाकारः समाधिः। आकारानवकारः समाधिः। नैर्वेधिकसर्व्वभवतलापगतः समाधिः। सङ्केतरुतप्रवेशः समाधिः। गिरिघोषाक्षरविमुक्तः समाधिः। ज्वलनोल्का समाधिः। लक्षणपरिशोधनः समाधिः। अनभिलक्षितः समाधिः। सर्व्वाकारवरोपेतः समाधिः। सर्व्वदुःखनिरभिनन्दी समाधिः। अक्षयकरण्डः समाधिः। धारणीमतिः समाधिः। सम्यक्त्वमिथ्यात्वसंप्रशमनः समाधिः। सर्व्वरोधविरोधासंप्रशमनः समाधिः। विमलप्रभः समाधिः। सारवती समाधिः। परिपूर्णचन्द्रविमलप्रभः समाधिः। विद्युत्प्रभः समाधिः। महाव्यूहः समाधिः। सर्व्वाकारप्रभाकरः समाधिः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समाधिसमता समाधिः। अरजोधिरजोनययुक्तः समाधिः। अरणसमवसरणः समाधिः। अरणसरण सर्व्वसमवसरणः समाधिः। अनिलम्भनिकेतनिरतः समाधिः। तथताश्चितनिश्चित्तः समाधिः। कायकलिसंप्रमथनः समाधिः। वाक्कलिविध्वंसनगगनकल्पः समाधिः। आकाशासङ्गविमुक्तिनिरुपणोपः समाधिः। इदमुच्यते बोधिसत्त्वस्य महासत्त्वस्य महायानं।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुताध्यात्मशून्यता। बहिर्द्धाशून्यता। अध्यात्मबहिर्द्धाशून्यता। शून्यताशून्यता। महाशून्यता। परमार्थशून्यता। संस्कृतशून्यता। असंस्कृतशून्यता। अत्यन्तशून्यता। अनवराग्रशून्यता। अनवकारशून्यता। प्रकृतिशून्यता। सर्व्वधर्म्मशून्यता। स्वलक्षणशून्यता। अनुपलम्भशून्यता। अभावशून्यता। स्वभावशून्यता। अभावस्वभावशून्यता। इदमुच्यते बोधिसत्त्वस्य महासत्त्वस्य महायानं।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत चत्वारि स्मृत्युपस्थानानि। चत्वारि सम्यक्प्रहाणानि। चत्वार ऋद्धिपादाः। पञ्चेन्द्रियाणि। पञ्चबलानि। सप्तबोध्यङ्गानि। आर्य्याष्टाङ्गमार्गः। आर्य्यसत्यानि। ध्यानानि। अप्रमाणानि। आरूप्यसमापत्तयः। अष्टौ विमोक्षाः। न वा ऽनुपूर्व्वविहारसमापत्तयः। शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि। अभिज्ञाः समाधयः। धारणीमुखानि। दशतथागतबलानि। चत्वारि वैशारद्यानि। चतस्रः प्रतिसम्विदः। महाकरुणा। अष्टादशावेणिकबुद्धधर्म्माः। इदमुच्यते बोधिसत्त्वस्य महसत्त्वस्य महायानं। यत् पुनः सुभूति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रेवमाह। सदेवमानुषासुरं लोकमभिभूयतन्महायानं निर्यास्य-तीति। कतमस्य सदेवमानुषासुरलोकः। यदुतकामधातुः। रूपधातुः। आरूप्यधातुः स चेत् सुभूते कामधातुस्तथता भविष्यदवितथता अनन्यतथताऽविपरीतो भूतं सत्यं यथावन्नित्यो-ध्रुवः शाश्वतः। अविपरिणामधर्माभावोभविष्यत्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते कामधातुः कल्पितो विठपितः सन्दर्भितः। अनित्योऽध्रुवोऽशाश्वतो विपरिणामधर्मा अभावः। तस्मात्तन्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्यास्यति। स चेत् सुभूते रूपधातुस्तथताऽभविष्यत् अवितथता अनन्यतथता विपरीतो भूतं सत्यं यथावन्नित्योध्रुवः शाश्वतः अविपरिणामधर्माभावोऽभविष्यत्। नेदं महायानं सदेव-मानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते रूपधातुः कल्पितो विठपितः सन्दर्भितः। अनित्योऽध्रुवोऽशाश्वतो विपरि-णामधर्माऽभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूय-निर्यास्यति। स चेत् सुभूते आरूप्यधातुस्तथताऽभविष्यत्। अवितथता अनन्यतथताऽविपरितं भूतं सत्यं यथावन्नित्यो ध्रुवः शाश्वतोऽविपरिणामधर्माभावोऽभविष्यत्। नेदं महायानं सदेव-मानुषासुरं लोकमभिभूयनिर्यास्यत्। तस्मात्तर्हि सुभूते रूपं कल्पितं विठपितं सन्दर्भितं। इदं सर्व्वमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्म अभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभि-भूयनिर्यास्यति। स चेत् सुभूते वेदनातथताऽभविष्यदवितथता-ऽनन्यतथता अविपरीताभूता सत्यायथावन्नित्याध्रुवाशाश्वता अवि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिणामधर्म्मिणी न खल्वभावोऽभविष्यत् नेदं महायानं सदेव-मानुषासुरलोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते वेदना-कल्पिता विठपिता सन्दर्भिता। इदं सर्व्वमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माऽभावस्तस्मान्महायानं सदेवमानुषासुरलोकमभि-भूयनिर्याति। स चेत् सुभूते संज्ञातथताऽभविष्यदवितथताऽनन्य-तथताऽविपरीताभूतासत्या यथावन्नित्याध्रुवाशाश्वताऽविपरिणाम-धर्म्मिणी न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते संज्ञाकल्पिता विठपिता सन्दर्भिता। इदं सर्व्वमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभाव-स्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते संस्कारास्तथाऽभविष्यन्नवितथा अनन्यतथा अविपरिभूता-सत्या यथावन्नित्याध्रुवाः शाश्वता अविपरिणामधर्म्माणः। न खल्व-भावोऽभविष्यन्नेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूय-निरयास्यत्। यस्मात्तर्हि सुभूते संस्काराः कल्पिता विठपिताः सन्दर्भिताः। इदं सर्व्वमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माऽभाव-स्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्याति। स चेत् सुभूते विज्ञानं तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवमशाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते विज्ञानं कल्पितं विठपितं सन्दर्भितं इदं सर्व्वमनित्यमध्रुव-मशाश्वतं विपरिणामधर्म्माऽभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स चेत् सुभूते चक्षुस्तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमपरिणामधर्म्म। न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते चक्षुः कल्पितं विठयितं सन्दर्भितं। इदं सर्व्वमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिनिर्याति। स चेत् सुभूते श्रोत्रं तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते श्रोत्रं कल्पितं विठयितं सन्दर्भितं। इदं सर्व्वमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते घ्राणस्तथाऽभविष्यदवितथाऽनन्यतथा ऽविपरितं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्यास्यत्। यस्मात्तर्हि सुभूते घ्राणं कल्पितं विठयितं सन्दर्भितं। इदं सर्व्वमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मात् सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते जिह्वा तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीताभूतासत्यायथावन्नित्याध्रुवाशाश्वताऽविपरिणामधर्म्मिणी न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। तस्मात्तर्हि सुभूते जिह्वा कल्पिता विठयिता सन्दर्भिता। इदं सर्व्वमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

Nityācārapradīpa, Vol. I, Fasc. 1-8, Vol. II, Fasc. 1-3 @ /10/ each ... Rs.	6	14
Nyāyabinduṭīkā, Fasc. 1 @ /10/ each ...	0	10
*Nyāya K[illegible], Vol. II, Fasc. 1-3 @ /10/ each ...	1	14
Nyayasarah ...	2	0
Padumāwati, Fasc. 1-5 @ 2/- ...	10	0
Prākrita-Paingalam, Fasc. 1-7 @ /10/ each ...	4	6
Prākṛta Lakṣaṇam, Fasc. 1 @ /1/8 each ...	1	8
Parāçara Smṛti, Vol. I, Fasc. 1-8, Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /10/ each ...	12	8
Parāçara, Institutes of (English) @ 1/- each ...	1	0
Pariksamukha Sutram ...	1	0
Prabandhacintāmaṇi English) Fasc. 1-3 @ 1/4/ each ...	3	12
Rasarnavam, Fasc. 1-3 ...	3	12
Saddarśana-Samuccaya, Fasc. 1-2 @ /10/ each ...	1	4
Samaraicca Kaha, Fasc. 1-3, @ /10/ ...	1	14
Sāṅkhya Sūtra [illegible] ...		
Ditto Vṛtti, Fasc. 1-4 @ /10/ each ...	2	8
[illegible] (English) Fasc. 1-3 @ 1/- each ...	3	0
Six Buddhist Nyaya Tracts ...	0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each ...	3	12
Sragdharā Stotra (Sanskrit and Tibetan) ...	2	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each ...	1	0
Suddhi Kaumudī, Fasc. 1-4 @ /10/ each ...	2	8
Sundaranandam Kavyam ...	1	0
Suryya Siddhanta, Fasc. 1 ...	1	4
Syainika Sastra ...	1	0
*Taittreya Brahmana, Fasc., 11-25 @ /10/ each ...	9	6
*Taittirīya Saṁhitā, Fasc. 27-45 @ /10/ each ...	11	14
*Tāṇḍya Brāhmaṇa, Fasc. 10-19 @ /10/ each ...	6	4
Tantra Vārtika (English) Fasc. 1-8 @ /1/4 ...	10	0
Tattva Cintāmaṇi, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-10; Vol. III, Fasc. 1-2; Vol. IV, Fasc. 1; Vol. V, Fasc. 1-5; Part IV, Vol. II, Fasc. 1-12 @ /10/ each ...	24	6
Tattva Cintamani Didhiti Vivriti, Fasc. 1, @ /10/ each ...	0	10
Ditto Prakas, Fasc. 1-3, @ /10/ each ...	1	14
Tattvārthādhigama Sutram, Fasc. 1-3 @ /10/ ...	1	14
Tirthacintamoni, Fasc. 1, @ /10/ each ...	0	10
Trikāṇda-Maṇḍanam, Fasc. 1-3 @ /10/ ...	1	14
Tul'si Satsai, Fasc. 1-5 @ /10/ ...	3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each ...	6	14
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ 1/- ...	6	0
Vallāla Carita, Fasc. 1 @ /10/ ...	0	10
Varṣa Kriyā Kaumudī, Fasc. 1-6 @ /10/ ...	3	12
*Vāyu Purāṇa, Vol. I, Fasc. 3-6; Vol. II, Fasc. 1-7; @ /10/ each ...	6	14
Vidhāna Pārijāta, Fasc. 1-8; Vol. II, Fasc. 1 @ /10/ ...	5	10
Ditto Vol. II, Fasc. 2-4, @ 1/4 ...	3	12
Vivādaratnākara, Fasc. 1-7 @ /10/ each ...	4	6
Vrhat Svayambhū Purāṇa, Fasc. 1-6 @ /10/ ...	3	12
Yogaśāstra, Fasc. 1-3 ...	3	12

Tibetan Series.

Bauddhastotrasangraha, Vol. I ...	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1-4, @ 1/- each ...	4	0
Nyayabindu of Dharmakirti, Fasc. 1 ...	1	0
Pag-Sam S'hi Tin, Fasc. 1-4 @ 1/- each ...	4	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans. Avadāna Kalpalatā) Vol. I, Fasc. 1-8 Vol. II, Fasc. 1-8 @ 1/- each ...	16	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-6 @ 1/ each ...	14	0

Arabic and Persian Series.

Al-Muqaddasi (English) Vol. I, Fasc. 1-4 @ 1/- ...	4	0
Āin-i-Akbarī, Fasc, 1-22 @ 1/8/ each ...	33	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, Index to Vol. II, @ 2/- each ...	36	0
Akbarnāmah, with Index, Fasc. 1-37 @ 1/8/ each ...	55	8
Akbarnāmah, English Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-7; Vol. III, Fasc. 1, @ 1/4/ each ...	20	0
Arabic Bibliography, by Dr. A Sprenger @ /10/ ...	0	10
Conquest of Syria, Fasc. 1-9 @ /10/ each ...	5	10
Catalogue of Arabic Books and Manuscripts 1-2 @ 1/- each ...	3	0

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

Catalogue of the Persian Books and Manuscripts in the Library the ... Rs. 3 0
Asiatic Society of Bengal, Fasc. 1-3 @ 1/- each ... Appendix Fasc. 1 @ ... 8
Dictiona of Arabic Technical Terms 1 0
1/8/ each 21 0
Fara Nama 4 0
Farnang-i Rashidi, Fasc. 1-14 @ 1/8/ each ... Lak ... ch 1 0
Fihrist-i Tusi, or Ṭūsy's list of Shy'ah Books, Fasc. 1-4 @ 1/ each ... 0 12
History of Gujarat ... ... Sp h ... 7 8
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12 ... Ins ... 1 14
History of the Caliphs, (English) Fasc. 1-6 @ 1/4/ each .. ukh ... 51 0
Iqālnamah-i-Jahāngiri, Fasc. 1-3 @ /10/ each ... aci ... 2 0
Isābah, with Supplement, 51 Fasc. @ 1/- each ... m ...
Ma'āṣir-i-Raḥīmī, Part I, Fasc. 1 ... ... Vol. III, 1-10;
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-9; Vol. III, Fasc. 10-12; Index
Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index ... 35 0
to Vol. III, Fasc. 11-12 @ /1/ each 1 0
Marhamu 'L-Ilali 'L-Mu'Dila 9 6
Muntakhabu-t-Tawarikh, Fasc. 1-15 @ 10/ each ...
Ditto (English), Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1 @ 1/- ... 16 0
each 11 14
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each 1 0
Ditto Part 3, Fasc. 1 ... ... 0 10
Nukhbatu-l-Fikr, Fasc. 1 @ /10/ 1 8
Nizāmi's Khiradnāmah-i-Iskandari, Fasc. 1-2 @ /12 each ...
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut.-Col. D. C. Phillott ... 5 0
... 3 2
Riyāzu-s-Salātīn, Fasc. 1-5 @ /10/ each 5 0
Ditto (English) Fasc. 1-5 @ 1/- 1 0
Tadhkira-i-Khushnavisān 14 0
Tabaquat-i-Nasiri (English), Fasc. 1-14 @ 1/- each 1 0
Ditto Index 4 6
Tārikh-i-Firūz Shāhi of Ẓiyāu-d-dīn Barni, Fasc. 1-7 @ /10/ each ... 3 12
Tārīkh-i-Firūzshāhi, of Shams-i-Sirāj Aif, Fasc. 1-6 @ /10/ each ... 3 0
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each ... 1 8
The Mabani 'L Lughat: A Grammar of the Turki Language in Persian ... 1 0
The Persian and Turki Divans of Bayran Khan, Khan Khanan ... 1 0
Tuzuk-i-Jahāngirī (Eng.) Fasc. 1 @ 1/- 3 2
Wis o Rāmīn, Fasc. 1-5 @ /10/ each 10 10
Zafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /10/ each

---

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. XIX and XX @ 10/- each 20 0
2. PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. JOURNAL of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16) @ 1/8 per No. to Members and @ 2/- per No. to Non-Members.

N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Journal and Proceedings, N.S., 1905, to date (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25°/ₒ to Members.
6. Centenary Review of the Researches of the Society from 1784-1883 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910 ... 8 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I-III, with 8 coloured Plates, 4to, @ 6/- each 18 0
9. Kaçmīraçabdāmṛta, Parts I and II @ 1/8/ 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notice of Sanskrit Manuscripts, Fasc. 1-35 @ 1/- each 35 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

31-5-11.

Books are supplied by V.P.P.